
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2692

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
अध्यात्मरामायण किष्किंधाकांड	—	पुराण	पूर्ण	-	9/12	70	संस्कृत	कागद	14	38		

अध्यात्मरामायणकिष्किंधाकांडप्रारंभः

श्र०रा०किं० श्रीगणेशायनमः ॥ ततइति ॥ सरसांश्रेष्ठं ॥ पंपासरः ॥१॥ विस्मयहेतूनाह ॥ क्रोशमात्रमिति ॥ अगाधामलशं
॥१॥ वरंनीरक्षीएंवुशंवरमित्यमरः अंवुजंपद्मंकल्हारस्तद्विशेषः एवमुत्पलपदेनकुमुदविशेषोत्र ॥२॥ हंसा
दयः पक्षिविशेषाः क्रौंचनादैरुपनादितेप्रतिजिध्वनिमत ॥३॥ सतांमनोवत्स्वछजलंउपस्टश्यस्नात्वा

॥श्रीमहादेवउवाच॥

श्रीगणेशायनमः ॥ ततःसलक्ष्मणोरामःशनैःपंपासरस्तटं ॥ आगत्यसरसांश्रेष्ठं दृष्ट्वावि
स्मयमाययौ ॥१॥ क्रोशमात्रसुविस्तीर्णमगाधामलशंबरं ॥ उत्फुल्लांबुजकल्हारकुमुदोत्प
लमंडितं ॥२॥ हंसकारं डवाकीर्णं चक्रवाकादिशोभितं ॥ जलकुक्कुटकोयष्टिक्रौंचनादोपना
दितं ॥३॥ नानापुष्पलताकीर्णं ना नाफलसमावृतं ॥ सतांमनःस्वच्छजलंपद्मकिंजल्कवा
सितं ॥४॥ तत्रोपस्टश्यसलिलंपीत्वाश्रमहरंविभुः ॥ सानुजःसरसस्तीरेशीतलेनपथायय
यौ ॥५॥ ऋष्यमूकगिरेःपार्श्वेगच्छंतौरामलक्ष्मणौ ॥ धनुर्बाणकरौदांतौजटावल्कलमंडि
तौ ॥६॥ पश्यंतौविविधान्वृक्षान्गिरेःशोभांसुविक्रमौ ॥ सुग्रीवस्तुगिरेर्मूर्ध्निचतुर्भिः
सहवानरैः ॥७॥ स्थित्वाददर्शतौयांतौ आरुरोहगिरेःशिरः ॥ भयादाहहनूमंतंकौतौवीरव
रौसखे ॥८॥ गच्छजानीहिभद्रंतेवटुर्भूत्वाद्विजाकृतिः ॥ वालिनाप्रेषितौकिंवामांहंतुसमुपा
गतौ ॥९॥
४॥५॥ दांतौनिगृहीतेंद्रियौविविधान्वृक्षान्गिरेःशोभांचपश्यंतौ ॥६॥ तौददर्शदृष्ट्वाचभयाद्गिरेःशिरआ
रुरोहत्यन्वयः ॥७॥ भद्रंतेइतिप्रेमणानिमित्तमाशीर्वादः ॥८॥ किंवालिनाप्रेषितौमांहंतुमागतौवापक्षांतरेउता

संज्ञांकुरुप ल्वायनार्थमिति शेषः एवं संकेतस्य निश्चयं जानीहि सर्पः ॥१०॥११॥१२॥ भाति जानाति प्रधानपुरुषौ मुख्य
पुरुषौ नरनारायणौ विसर्पः ॥ मुख्यत्वमेवाह जगद्धेतू इत्यादिना ॥१३॥ लीलया चरंता विभ्रमगछंता विवस्त्रतौ वि
मुखाकृतिहीनावेव ॥१४॥ स्थितिलयौ सर्गं च लीलया कर्त्तुमुद्यतौ रक्षसां लयस्तदितरजगतः सर्गस्थिती १५

तांभ्यां संभाषणं कृत्वा जानीहि हृदयं तयोः ॥ यदि तौ दुष्टहृदयौ संज्ञां कुरु करेण तः ॥१०॥ साधु
त्वेस्मितवक्त्रो भूरेवं जानीहि निश्चयं ॥ तथेति बटुरूपेण हनुमान् समुपागतः ॥११॥ विनया
वनतो भूत्वा रामं नत्वेदमब्रवीत् ॥ कौ युवां पुरुषव्याघ्रौ युवानौ वीरसंमतौ ॥१२॥ द्योतयं
तौ दिशः सर्वाः प्रभया भास्कराविव ॥ युवां त्रैलोक्यकर्त्ताराविति भाति मनो मम ॥१३॥ युवां
प्रधानपुरुषौ जगद्धेतू जगन्मयौ ॥ मायया मानुषाकारौ चरंताविव लीलया ॥१४॥ भूभा
रहरणार्थाय भक्तानां पालनाय च ॥ अवतीर्णाविह परौ चरंतौ क्षत्रियाकृती ॥१५॥ जगत्स्थि
तिलयौ सर्गं लीलया कर्त्तुमुद्यतौ ॥ स्वतंत्रौ प्रेरकौ सर्वहृदयस्थाविहेश्वरौ ॥१६॥ नरनारा
यणौ लोके चरंताविति मे मतिः ॥ श्रीरामो लक्ष्मणं प्राह पश्यैनं बटुरूपिणं ॥१७॥ शाब्दशास्त्रम
शेषेण श्रुतं नूनमनेकधा ॥ अनेन भाषितं कृत्स्नं न किंचिदपशब्दितं ॥१८॥

॥ प्रेरकौ अंतर्यामित्
चेत्सर्पः ॥ तदेवाह सर्वहृदयस्थाविति ॥ इहलोके चरंतौ इत्यन्वयः ॥१६॥ शाब्दं शास्त्रं व्याकरणं ॥१७॥ कृत्स्नं
वहिसर्पः ज्ञानविग्रह इत्यनेन चिदानंद एव मायया एव शरीररूपेण भातीति सूचितं ॥१८॥

रा०अ०कि० १९॥२०॥ यः सुग्रीवो नाम तेन नाम्ना प्रसिद्धो वानराणां राजा स गिरिमूर्ध्नि तिष्ठतीत्यन्वयः॥२१॥ तत्रावस्थाने हेतुमा
२ ह॥ भ्रात्रेति निष्काशितः हीनराज्यः कृतः भार्या च हृता॥२२॥२३॥ तेन सख्यं युक्तं समदुःखत्वात् नतु वालिने ति

ततः प्राह हनूमंतं राघवो ज्ञानविग्रहः॥ अहं दाशरथी रामस्त्वयं मे लक्ष्मणोनुजः॥१९॥ सीतया भा
र्यया सार्धं पितुर्वचनगौरवात्॥ आगतस्तत्र विपिने स्थिता हं दंडके द्विज॥२०॥ तत्र भार्या हृता सी
ता रक्षसा केन चिन्मम॥ तामन्वेष्टुमिहायातौ त्वं को वा कस्य वा वद॥२१॥ बटुरुवाच॥ सुग्रीवो ना
म राजा यो वानराणां महामतिः॥ चतुर्भिर्मंत्रिभिः सार्धं गिरिमूर्ध्नि तिष्ठति॥२२॥ भ्राता कनीयान्
सुग्रीवो वालिनः पापचेतसः॥ तेन निष्काशितो भार्या हृता तस्य हि वालिना॥२३॥ तद्भयादृष्यमूका
ख्यं गिरिमाश्रित्य संस्थितः॥ अहं सुग्रीवसचिवो वायुपुत्रो महामते॥२४॥ हनूमान्नाम विख्या
तो ह्यंजनीगर्भसंभवः॥ तेन सख्यं त्वया युक्तं सुग्रीवेण रघूत्तम॥२५॥ भार्यापहारिणं हंतुं
सहायस्ते भविष्यति॥ इदानीमेव गच्छामं आगच्छ यदि रोचते॥२६॥ राम उवाच॥ अहमप्या
गतस्तेन सख्यं कर्तुं कपीश्वर॥ सख्युस्तस्यापि यत्कार्यं तत्करिष्याम्यसंशयं॥२७॥ हनूमान्
स्वस्वरूपेण स्थितो रामं मथाब्रवीत्॥ आरोहतां मम स्कंधौ गच्छामः पर्वतोपरि॥२८॥

भावः॥२४॥२५॥ तस्यापि यत्कार्यं वालिवधरूपं॥२६॥ पर्वतोपरिगमने श्रमातिशयायात् [illegible] स्वस्कंधारो
हेणाप्रेरणं॥२७॥ मंत्रिभिः सहेति शेषः तथेति उक्ते इति शेषः॥२८॥ एम

एम०
२

उत्पपातउत्पत्यजगामेत्यर्थः स्थितौस्थापितौविसर्पः ॥२९॥ भेतुमपंबालिप्रेरिताविति शंकाकृतं ॥३०॥ योजितं
ताभ्यामंगीकारं कारितं आरोप्य कृत्वा ॥३१॥ विष्टरायत्र्यासनार्थः ॥३२॥३३॥३४॥३५॥ शत्रुघातिनस्ते

यत्र तिष्ठति सुग्रीवो मंत्रिभिर्वालिनो भयात् ॥ तथेति तस्पारुरोह स्कंधं रामोथलक्ष्मणः
॥२९॥ उत्पपात गिरेर्मूर्ध्नि क्षणाद्देव महाकपिः ॥ वृक्षच्छायां समाश्रित्य स्थितौ तौ रामलक्ष्मणौ
॥३०॥ हनूमानपि सुग्रीवमुपगम्य कृतांजलिः ॥ भेतु ते भयमायातौ राजन् श्रीरामलक्ष्मणौ
॥३१॥ शीघ्रमुत्तिष्ठ रामेण सख्यं ते योजितं मया ॥ अग्निं साक्षिणमारोप्य तेन सख्यं द्रुतं कुरु
॥३२॥ ततोतिहर्षात्सुग्रीवः समागम्य रघूत्तमं ॥ वृक्षशाखां स्वयं छित्वा विष्टरायददौ मुदा
॥३३॥ हनुमान्लक्ष्मणस्यादात्सुग्रीवापि च लक्ष्मणः ॥ हर्षेण महताविष्टाः सर्वे एवावतस्थि
रे ॥३४॥ लक्ष्मणस्त्वब्रवीत्सर्वं रामवृत्तांतमादितः ॥ वनवासाभिगमनं सीताहरणमेव च
॥३५॥ लक्ष्मणोक्तं वचः श्रुत्वा सुग्रीवो राममब्रवीत् ॥ अहं करिष्ये राजेंद्र सीतायाः परिमा
र्गणं ॥३६॥ सहायमपि ते राम करिष्ये शत्रुघातिनः ॥ श्रणु राम मयादृष्टं किंचित्ते कथयाम्य
हं ॥३७॥

शत्रुवधे सहायमपि करिष्ये इत्यन्वयः ॥३६॥ विहायसानीयमानानां मम दोत्तमा प्रपरूप मितिद्योषः
॥३७॥

रा०अ०कि०
२

साच राम रामेति क्रोशंती अस्मात्पर्वतोपरि दृष्ट्वास्मोत्तरीयेणतदेकदेशेनाभरणानि आमुच्य बध्वा पुनरस्मान्नि
रीक्ष्य तानि अधः परित्यज्य क्रोशंती तेन नीता क्रोशनक्रियया समानकर्तृकत्वं सा क्रोशंतीत्यर्थः अस्माकं च तानि गुहायामक्षि
पं ३९ ४० इदानीं त्वमपि पश्य तव भार्याया भवतीवा न भवंतिचेति जानीहि निश्चयं कुरु ४१ ततः भूषणसु

एकदा मंत्रिभिः सार्द्धं स्थितोहं गिरिमूर्धनि ॥ विहायसा नीयमानां केनचित्प्रमदोत्तमां ॥ ३८ ॥ क्रो
शंती राम रामेति दृष्ट्वास्मान् पर्वतोपरि ॥ आमुच्याभरणान्याशु स्वोत्तरीयेण भामिनी ॥ ३९
निरीक्ष्याधः परित्यज्य क्रोशंती तेन रक्षसा ॥ नीताहं भूषणान्याशु गुहायामक्षिपं प्रभो ॥ ४० ॥ इ
दानीमपि पश्य त्वं जानीहि तव वा न वा ॥ इत्युक्त्वानीय रामाय दर्शयामास वानरः ॥ ४१ ॥ विमुच्य रा
मस्तद्दृष्ट्वा हा सीतेति मुहुर्मुहुः ॥ हृदि निक्षिप्य तत्सर्वं रुरोद प्राकृतो यथा ॥ ४२ ॥ आश्वास्य राघवं
भ्राता लक्ष्मणो वाक्यमब्रवीत् ॥ अचिरेणैव ते राम प्राप्यते जानकी शुभा ॥ ४३ ॥ वानरेंद्रसहा
येन हत्वा रावणमाहवे ॥ सुग्रीवोप्याह हे राम प्रतिज्ञां करवाणि ते ॥ ४४ ॥ समरे रावणं हत्वा त
व दास्यामि जानकीं ॥ ततो हनूमान् प्रज्वाल्य तयोरग्निं समीपतः ॥ ४५ ॥
॥ सीतावासःखंडं विमुच्य दृष्ट्वा
भूषणानीति शेषः तत्सर्वं भूषणजातं ४२ ते त्वया ४३ ४४ तयोः समीपतोग्निं प्रज्वाल्य सख्यं कु
रुतामित्युवाचेति शेषः ॥ ४६ ॥ राम राम ॥ राम ॥ राम ॥ राम ॥ राम ॥ राम राम

राम
३

श्चालिंग्य परस्परं सखेऽद्य स्वदेताभिति शेषः सखित्वकरणफलं दर्शयति समीपेऽति ॥ ४७ ॥ वालिना यदुदंतं महि
षये कृतं तच्छृणु ॥ ४८ ॥ नाम्नी मायावी स्वन्वयः ॥ समुपाह्वयत् युद्धायेति शेषः ॥ ४९ ॥ तदा ह्वानममर्षणः स

तावुभौ रामसुग्रीवावग्नौ साक्षिणि तिष्ठति ॥ बाहू प्रसार्य चालिंग्य परस्परमकल्मषौ ॥ ४६ ॥ समीपे र
घुनाथस्य सुग्रीवः समुपाविशत् ॥ स्वोदंतं कथयामास प्रणयाद्रघुनायके ॥ ४७ ॥ सखे शृणु ममोदंतं
वालिना यत्कृतं पुरा ॥ मयपुत्रोथ मायावी नाम्ना परमदुर्मदः ॥ ४८ ॥ किष्किंधां समुपागत्य वालिनं
समुपाह्वयत ॥ सिंहनादेन महता वाली तु तदमर्षणः ॥ ४९ निर्ययौ क्रोधताम्राक्षो जघान दृढ
मुष्टिना ॥ दुद्रावे तेन संविग्नो जगाम स्वगुहां प्रति ॥ ५० ॥ अनुद्रावत वाली मायाविनं महत्तया ॥ त
तः प्रविष्टमालोक्य गुहां मायाविनं रुषा ॥ ५२ ॥ वाली मामाह तिष्ठ त्वं बहिर्गच्छाम्यहं गुहां ॥ इत्युक्त्वा
विशत्स गुहां मासमेकं स निर्ययौ ॥ ५३ ॥ मासादूर्ध्वं गुहाद्वारान्निर्गतं रुधिरं बहु ॥ तद्दृष्ट्वा परितप्तो
गो मृतो वालीति दुःखितः ॥ ५४ ॥ गुहाद्वारि शिलामेकां निधाय गृहमागतः ॥ ततो ब्रुवं मृतो वाली गु
हायां रक्षसा हतः ॥ ५५ ॥ तच्छ्रुत्वा दुःखिताः सर्वे मामनिच्छंतमप्युत ॥ राज्येभिषेचनं चक्रुः सर्वे वानरमं
त्रिणः ॥ ५६ ॥

हमानः ॥ ५० ॥ तेन मुष्टिघातेन संविग्नः पीडितः ॥ ५१ ॥ तं मायाविनामानं मायावं तं स्वगुहां प्रविष्टमालोक्येत्यन्व
यः ॥ ५२ ॥ ५३ ॥ मृतो वालीति निश्चयेनेति शेषः ॥ ५४ ॥ रक्षसा हतो वाली मृत इति स्वज्ञातीनब्रुवं ॥ ५५ ॥ अनिच्छंतं

अभिषेकमिति खंडः ॥ ९ ॥

रा० अ० किं० श्लिष्टं पालितं पुरुषं भ्रात्रा नेषि निस्तादिवाक्यं ॥५७॥ परयाभियावालिजया ॥५८॥ ऋष्यमूकं तदा रम्यमिमं पर्वतं ऋ
४ षेः शापभयात्तत्त्रानुपदमेव स्फुलितं पुरुषं भ्रात्रा नेषि निस्सादिवाक्यं ॥५७॥ परयाभियावालिजया ॥५८॥
ऋष्यमूकं तदा रम्यमिमं पर्वतं ऋषेः शापभयात्तत्त्रानुपदमेव स्फुरं नविष्यति ॥५९॥ हताश्रया हतग्र

श्लिष्टं तदा मया राज्यं किंचित्कालमरिंदम ॥ ततः समागतो वाली मामाह परुषं रुषा ॥५७॥ ब
हुधा भर्त्सयित्वा मां निर्जघान च मुष्टिभिः ॥ ततो निर्गत्य नगरादधावं परयाभिया ॥५८॥ लोकान्सर्वा
न्परिक्रम्य ऋष्यमूकं समाश्रितः ॥ ऋषेः शापभयात्सोपि नायातीमं गिरिं प्रभो ॥५९॥ तदादिम
म्भार्यं संस्वयं भुंक्ते विमूढधीः ॥ अतो दुःखेन संतप्तो हृतदारो हताश्रयः ॥६०॥ वसाम्यद्य भव
त्पादसंस्पर्शात्सुखिनोस्म्यहं ॥ मित्रदुःखेन संतप्तो रामो राजीवलोचनः ॥६१॥ हनिष्यामि
तव द्वेष्यं शीघ्रं भार्यापहारिणं ॥ इति प्रतिज्ञामकरोत्सुग्रीवस्य पुरस्तदा ॥६२॥ सुग्रीवोप्या
ह राजेंद्र वाली बलवतां बली ॥ कथं हनिष्यति भवान् देवैरपि दुरासदं ॥६३॥ शृणु ते कथयि
ष्यामि तद्बलं बलिनां वर ॥ कदाचित् दुंदुभिर्नाम महाकायो महाबलः ॥६४॥

॥ हः ६० सुखिनोस्मि त्र्यध राम
त्वादृशमित्रलाभेनेति शेषः ६१ ६२ बलवतां बली सर्वेभ्योपि बलवद्भ्योप्यधिकबलवानित्यर्थः दुरा ४
सदं वालिनमिति शेषः ॥६३॥ राम ॥ ॥ राम ॥ ॥ राम ॥ राम ॥ ॥ राम ॥ राम ॥

तद्बलं वालिनो बलं ॥६४॥६५॥ असहमानइतिच्छेदः ॥६६॥ अस्य शिरो हस्ताभ्यां भ्रामयन् ग्रीवातश्चालयन् छि
त्वा ग्रीवारुपादाधारं दुस्लाघ हस्ताभ्यां तोलयित्वा एतावद्भारकमिति ज्ञात्वा भुवि अक्षिपत् ॥६७॥ क्षेपवे

किष्किंधामगमच्छ्राम्यन् महामहिषरूपधृक् ॥ युद्धाय वालिनं रात्रौ समाह्वयत भीषणः ॥६५॥ त
च्छ्रुत्वाऽसहमानो सौ वाली परमकोपनः ॥ महिषं शृंगयोर्धृत्वा पातयामास भूतले ॥६६॥ पा
दैनैकेन तत्काय आक्रम्यास्य शिरो महत् ॥ हस्ताभ्यां भ्रामयन् छित्वा तोलयित्वाक्षिपद्भुवि ॥६७॥ पपा
त तच्छिरो राममातंगाश्रमसन्निधौ ॥ योजनास्पतितं तस्मान्मुनेराश्रममंडले ॥६८॥ रक्तवृष्टिः पपाता
त्रैर्दृष्ट्वा तां क्रोधमूर्छितः ॥ मातंगो वालिनं प्राह यद्यागंतासि मे गिरिं ॥७०॥ इतः परं भग्नशिरा मरिष्य
सि न संशयः ॥ एवं शप्तस्ततो रम्यऋष्यमूकं न यात्यसौ ॥ एतन्ज्ञात्वाहमप्यत्र वसामि भयवर्जितः ॥
राम पश्य शिरस्तस्य दुंदुभेः पर्वतोपमं ॥७१॥ तत्क्षेपणे यदा शक्तः प्राप्तस्त्वं वालिनो वधे ॥ इत्युक्त्वा दर्श
यामास शिरस्तद्गिरिसन्निभं ॥७२॥ दृष्ट्वा रामः स्मितं कृत्वा पादांगुष्ठेन चाक्षिपत् ॥ दशयोजनप
र्यंतं तदद्भुतमिवाभवत् ॥७३॥ साधु साध्विति संप्राह सुग्रीवो मंत्रिभिः सह ॥ पुनरप्याह सुग्रीवो रामं भ
क्तपरायणं ॥ एते ताला महासाराः सप्तपस्पर घूतम ॥७४॥

॥गेन भुव ऊर्ध्वं योजनमात्रं गत्वा ततो भामातंगाश्रमे
पपात यतश्च योजनात्तन्मितादूर्ध्व शाल्पतितेति ॥६८॥ अतस्तदाश्रमे शिरसो गलितात् रक्तवृष्टिः पपात ततः क्रुद्धः स

वालिनं प्राह ६९ एतत्ज्ञात्वा तदनागमं ज्ञात्वा ७१
यदा पदितस्य वा ऐन दूरं क्षेपणे त्वं शक्तोऽन्तर्हितं
वालिवधे शक्तः ७२ ७४

रा०अ०कि० चालयित्वा मूलतो वा हुभ्यां कंपनेन अंजसा॥ अनायासेन छिद्रं करोति सप्त स्वापी तिशोषः॥७५॥७६॥७७॥७८॥ एवमाश्चर्य
५ कर्मणा रामं परमात्मानं ज्ञात्वा स्तौति देवेति संगतः संगतिं मैत्रीं प्राप्तः॥७९॥ मोक्षसचिवं मोक्षप्रदत्वात्तत्सचिवं भवं संसारं
८०॥ अस्मद्दारपुत्रादिकं त्वन्मायाकृतत्वेन मायिकत्वान्नाकांक्षेतो मां निवर्त्तयेत्यर्थः॥८१॥ मद्दर्पभूमिरंखनताय या

एकैकं चालयित्वा सो निष्पत्रानकुरुतेंजसा॥ यदि त्वमेकबाणेन विध्वा छिद्रं करोषि चेत्॥७५॥ हतस्त्वया
तदा वाली विश्वासो मे प्रजायते॥ तथेति धनुरादाय सायकं तत्र संदधे॥७६॥ बिभेद च ततो रामः सप्त ता
लान्महाबलः॥ तान्सप्त विनिर्भिद्य गिरिं भूमिं च सायकः॥७७ पुनरागत्य रामस्य तूणीरे पूर्ववत्स्थितः॥
४ ति ततो हर्षात्सुग्रीवो राममाहातिविस्मितः॥७८॥ देव त्वं जगतां नाथः परमात्मा न संशयः॥ मत्पूर्वकृततपु
ण्यौघैः संगतोद्य मया सह॥७९॥ त्वां भजंति महात्मानः संसारविनिवृत्तये॥ त्वां प्राप्य मोक्षसचिवं प्रा
र्थयेहं कथं भवं॥८०॥ दारपुत्रा धनं राज्यं सर्वं त्वन्मायया कृतं॥ अतोहं देवदेवेश नाकांक्षेन्यत्प्रसी
द मे॥८१॥ आनंदानुभवं त्वाद्य प्राप्तोहं भाग्यगौरवात्॥ मृदर्थं यतमानेन निधानमिव सत्तमः॥८२॥
अनाद्यविद्यासंसिद्धं बंधनं छिन्नमद्य नः॥ यज्ञदानतपःकर्मपूर्तेष्टादिभिरप्यसौ॥८३॥

॥निधानं धनरा
शिः प्राप्तो भवति एवमहमानंदानुभवं तद्रूपं त्वां प्राप्तः॥८२॥ अनाद्याविद्यासंसिद्धं निष्पन्नं विषयवासनारूपं बं
धनं संसारप्रवर्त्तकं न छिन्नं नष्टं अन्येभ्यो भवद्दर्शनस्याधिक्यमाह नेति यज्ञेत्यादि यज्ञादिभिरप्यसौ संस्

तिसिद्धिकारणं विमुक्तवमानां एवं मुक्तं नं जातं
सिक्रानुगुरायभावेव भजते यश्रीमवहुजत्र
सहसनामकोमि॥८३॥ ५

८४ यस्य चित्ते तस्या नर्थानां नाना संसृति रूपाणां मूलमज्ञानं न उत्पतीत्यन्वयः॥ ८५॥ मे मनः सदा त्वयि तिष्ठतु यस्य
वाणी त्वन्नाम गायति समुच्यते॥ ८६॥ ८७ बंधस्य संसार कारणस्य मोचनी॥ ८८॥ त्वन्मायया कृतः संसारो यस्य सः
त्वदंशः त्वत्प्रति बिंबरूपत्वात् अतः सपादयोर्भक्तिमदिश्य दत्वा त्राहि॥ ८९॥ त्वन्मायावृतचेतस इतः पूर्वं सि

न जीयते पुनर्दीर्घं भजते संसृतिः प्रभो॥ त्वत्पादर्शनात्सद्यो नाशं मेति न संशयः॥ ८४॥ क्षणार्ध
मपि यच्चित्तं त्वयि तिष्ठत्य चंचलं॥ तस्या ज्ञानमनर्थानां मूलं नश्यति तत्क्षणात्॥ ८५॥ तत्ति ष्ठतु
मनो राम त्वयि नान्यत्र मे सदा॥ राम रामेति यद्वाणी मधुरं गायति क्षणं॥ सब्रह्महा सुरापो वा मुच्यते स
र्वपातकैः॥ ८७॥ न कांक्षे विजयं राम न च दार सुखादिकं॥ भक्तिमेव सदा कांक्षे त्वयि बंध विमोचनी॥
८८॥ त्वन्मायाकृत संसार स्त्वदंशो हं रघूत्तम॥ स्वपाद भक्तिमादिश्य त्राहि मां भव संकटात्॥ ८९॥
पूर्वं मित्रार्युदासीना स्त्वन्मायावृत चेतसः॥ आसन्मेद्य भवत्पाद दर्शनादेव राघव॥ ९०॥ सर्वं ब्रह्मै
व मे भाति क्व मित्रं क्व च मे रिपुः॥ यावत्त्वन्मायया बद्धस्तावद्गुण विशेषता॥ ९१॥ सा यावदस्ति नानात्वं
तावद्भवति नान्यथा॥ यावन्नानात्वमज्ञानात्तावत्कालकृतं भयं॥ ९२॥ अतोऽविद्यामुपास्ते यः सोंधे त
मसि मज्जति॥ मायामूलमिदं सर्वं पुत्र दारादि बंधनं॥ अतोत्सारय मायां त्वं दासींत्व रघूत्तम॥ ९३॥

त्रादयः आसन् अद्य तु त्वया दर्शनान्मे सर्वं ब्रह्मैवेति भातीत्यन्वयः॥ ९०॥ गुणविशेषत्ता सत्वादिगुणविशेषवत्तेस
र्यः॥ ९१॥ सा गुणविशेषत्ता नानात्वं सुहृन्मित्रायुदासीनत्वरूपो भेदः कालकृतं मृत्युकृतं॥ ९२॥ अतः अविद्यामिति

क्षेटी॥ अष्टकसारे लिष्ठेटी॥ ९३॥

रा०अ०किं० त्वत्पादपद्मयोरर्पिता चित्तवृत्तिर्येन सः॥ईदृशोहं भूयासमितिशेषः त्वन्नामविषयसंगीतकथासुवाणी निरता तिष्ट
त्विसन्वयः त्वद्भक्तानां सेवायां निरतौ तत्करौ॥१४॥ त्वन्मूर्तिभक्तान् त्वन्मूर्त्तयश्च तद्भक्ताश्च तान् सकर्णः त्वज्जन्मा
निमायिकानि तत्र त्व कर्माणि च श्रृणोत्वित्यन्वयः॥१५॥ अहिद्मात्रुके तोगरुडध्वजमे शिरस्त्वदीय भवपद्मजाद्यै

त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वंन्नामसंगीतकथासुवाणी॥ त्वद्भक्तसेवानिरतौ करौ मे त्वदंगसं
गलभतां मदंगं॥१४॥ त्वन्मूर्तिभक्तान् स्वगुरुंच चक्षुः पश्यत्वजस्रं स श्रृणोतु कर्णः॥ त्वज्जन्मकर्मा
णिच पादयुग्मं व्रजत्वजस्रं तव मंदिराणि॥१५॥ अंगानि ते पादरजोविमिश्रतीर्थानि बिभ्रत्वहि
४स शत्रुकेतो॥ शिरस्त्वदीयं भवपद्मजाद्यैर्जुष्टं पदं राम नमेजस्रं॥१६॥ इति श्रीमदध्यात्मरामायणे
५ श्रीमहादेवउवाच॥ उमामहेश्वरसंवादे किष्किंधाकांडे प्रथमः सर्गः॥१॥ इत्थं स्वात्मपरिष्वंगनिर्धूताशेषकल्मषं॥ रा
मः सुग्रीवमालोक्य सस्मितं वाक्यमब्रवीत्॥१॥ मायां मोहकरीं तस्मिन् वितन्वन् कार्यसिद्धये॥ स
खे त्वदुक्तं यत्तन्मे सत्यमेव न संशयः॥२॥ किं तु लोका वदिष्यंति मामेवं रघुनंदनः॥ हतवान्
किकपीशं स सख्यं हत्वाग्निसाक्षिकं॥३॥
॥ शिवब्रह्माद्यैः सेवितं पदं नमतु॥१६॥ इति प्रथमः सर्गः स्वात्म
परिष्वंगः स्वशरीरालिंगनं तेन दूरीकृताशेषपापं संस्मितमायाया भगवद्दासरूपत्वेन स्मितद्वारा मायया तदावरणं॥१॥
कार्येणैव एवं धः यन्मां प्रति त्वदुक्तं त्वयोक्तं तत्सत्यमेव॥२॥ रघुनंदनः अग्निसाक्षिकं सख्यं हत्वा कपींद्राय तदु

पकार्यं किं हतवानसि वेलोकेकामं मां वहिक्लि
अतस्त्वं पृच्छकारिमे वरं काम्यं स्पृहतिष्ठः॥३॥ ॥
राम

उक्तमेव द्राघयितुं पुनराह इतीति भद्रं ते इत्यनेन मदाज्ञाकरणे एव ते भद्रं नान्यथेति सूचितं ॥४॥ तथेतीत्यस्य प्रतिज्ञायेति
शेषः ॥५॥ महानादं महाप्रतिध्वनिजनकं ॥ आह्वयत स्पर्धया प्रावृतवान् ॥६॥७॥८॥ एकरूपौ समानाकारौ अत एव
रामो बाणं न मुमोच ॥९॥१०॥ जहि शात्रवेणेति शेषः ॥११॥ प्रत्ययं कृत्वा विश्वासमुत्पाद्य स सवादिनि स्यादिराक्षेपः ॥१२॥

इति लोकापवादो मे भविष्यति न संशयः ॥ तस्मादाह्वय भद्रं ते गत्वा युद्धाय वालिनं ॥४॥ बाणेनैकेन
तं हत्वा राज्ये त्वामभिषिंचये ॥ तथेति गत्वा सुग्रीवः किष्किंधोपवने स्थितः ॥५॥ कृत्वा शब्दं महानादं तमा
ह्वयत वालिनं ॥ तच्छ्रुत्वा भ्रातृनिनदं रोषताम्रविलोचनः ॥६॥ निर्जगाम गृहाच्छीघ्रं सुग्रीवोपरि वान
रः ॥ तमापतंतं सुग्रीवः शीघ्रं वक्षस्यताडयत् ॥७॥ सुग्रीवमपि मुष्टिभ्यां जघान क्रोधमूर्छितः ॥
वाली तमपि सुग्रीव एवं क्रुद्धौ परस्परं ॥८॥ अयुध्येतामेकरूपौ दृष्ट्वा रामोऽति विस्मितः ॥ न मुमो
च तदा बाणं सुग्रीववधशंकया ॥९॥ ततो दुद्राव सुग्रीवो वमन् रक्तं भयाकुलः ॥ वाली स्वभवनं या
तः सुग्रीवो राममब्रवीत् ॥१०॥ किं मां घातयसे राम शत्रुणा भ्रातृरूपिणा ॥ यदि मे हनने वांछा त्वमे
व जहि मां विभो ॥११॥ एवं मे प्रत्ययं कृत्वा सत्यवादिन् रघूत्तम ॥ उपेक्षसे किमर्थं मां शरणागतवत्स
ल ॥१२॥

वां युवां समानाकारौ दृष्ट्वा मित्रघातशंकयाहं सायकं न मुक्तवानित्यन्वयः ॥१३॥ भ्रमशांतये भ्रमशांतिफलकं
॥१४॥ अहं राम इत्यनेन स्वस्यामिथ्याभाषित्वं सूचितं ॥ त्वां शपे यदि न हनिष्यामि तर्हि मित्रस्य तवैव शपथ इत्यर्थः

रा०अ०कि०
७

१५॥ पुष्पितां मालामामुच्य संबंध्य प्रेष्य तामिसन्वयः॥१६॥१७॥१८॥ परिकरं कच्छं बंधाधिरूपं॥१९॥२०॥ तेव त्वोभग्नः
पुनरायाति गर्जन्युद्धार्थमायाति॥२१॥ तत्कृता सुग्रीवसहायविषयाकरं परित्यज्य गच्छ त्वं ततः पुरमिति शेषः

श्रुत्वा सुग्रीववचनं रामः साश्रुविलोचनः॥ आलिंग्य मास्म भैषीस्त्वं दृष्ट्वा वा मे करूपिणौ॥१३॥
मित्रघातित्वमाशंक्य मुक्तवान्सायकं न हि॥ इदानीमेव ते चिन्हं करिष्येन्यमनोगतये॥१४॥ गत्वा
ह्वय पुनः शत्रुं हतं द्रक्ष्यसि वालिनं॥ रामो हत्वो शरेण भ्रातरं निष्यामि ति पुक्षणे त॥१५॥ इत्याश्वास्य
स सुग्रीवं रामो लक्ष्मणमब्रवीत॥ सुग्रीवस्य गले पुष्पमालामामुच्य पुष्पितां॥१६॥ प्रेषय स्व महाभा
ग सुग्रीवं वालिनं प्रति॥ लक्ष्मणस्तु तदा बध्वा गच्छ गच्छेति सादरं॥१७॥ प्रेषयामास सुग्रीवं सोपि ग
त्वा तथाकरोत॥ पुनरप्यद्भुतं शब्दं कृत्वा वालिनमाह्वयत॥१८॥ तच्छ्रुत्वा विस्मितो वाली क्रोधेन
महतावृतः॥ बध्वा परिकरं सम्यक् गमनायोपचक्रमे॥१९॥ गच्छंतं वालिनं तारा गृहीत्वा निषिषे
धतं॥ न गंतव्यं त्वयेदानीं शंका मे तीव्र जायते॥२०॥ इदानीमेव ते भग्नः पुनरायाति स त्वरः॥ सहायो ब
लवान्नतस्य कश्चिन्नूनं समागतः॥२१॥ वाली तामाह हे सुभ्रु शंका ते व्येतु तत्कृता॥ प्रियेकरं परित्यज्य
गच्छ गच्छामि तं रिपुं॥२२॥ हत्वा शीघ्रं समायास्ये सहायस्तस्य को भवेत्॥ सहायो यदि सुग्रीवस्ततो हत्वो
भयं क्षणात्॥२३॥

२२॥ मत्तो रक्षितुं जीवितार्थाकस्तस्य सहयो भवेदिसन्वयः॥२३॥ रामायनमः॥ रामायनमः॥ रामः

राम०
७

आह्वयमानं रिपुं ज्ञात्वा पिशाचः कथं गृहे तिष्ठेतु अतस्त्वं हत्वा आयास्यामीति छेदः ॥२४॥ यन्मामंगदो मगयायां श्रुतं वचआह ॥ तच्छ्रुत्वा यथोचितं कुरु ॥२५॥२६॥ रावणेन सीता हृता तां सह भ्रात्रा मार्गमाणो ऋष्यमूकाद्रिमागतः

आयास्ये मा शुचः शूरः कथं तिष्ठेद्गृहे रिपुं ॥ ज्ञात्वाप्याह्वयमानं हि हत्वायास्यामि सुंदरि ॥२४॥ तारा उवाच ॥ मत्तोन्य च्छृणु राजेंद्र श्रुत्वा कुरु यथोचितं ॥ अहमामंगदः पुत्रो मगयायां श्रुतं वचः ॥२५॥ अयोध्याधिपतिः श्रीमान् रामो दाशरथिः किल ॥ लक्ष्मणेन सह भ्रात्रा सीतया भार्यया सह ॥२६॥ आगतो दंडकारण्यं तत्र सीता हृता किल ॥ रावणेन सह भ्रात्रा मार्गमाणोथ जानकीं ॥२७॥ आगतो ऋष्यमूकाद्रिं सुग्रीवेणास मागतः ॥ चकार तेन सुग्रीवः सख्यं चानलसाक्षिकं ॥२८॥ प्रतिज्ञां कृतवान् रामः सुग्रीवाय सलक्ष्मणः ॥ वालिनं समरे हत्वा राजानं त्वां करोम्यहं ॥२९॥ इति निश्चित्य तौ यातौ निश्चितं शृणु मद्वचः ॥ इदानीमेव ते भग्नः कथं पुनरुपागतः ॥३०॥ अतस्त्वं सर्वथा वैरं त्यक्त्वा सुग्रीवमानय ॥ यौवराज्ये भिषिंचास्मुरामं त्वं शरणं व्रज ॥३१॥ पाहि मामंगदं राज्यं कुलं च हरिपुंगव ॥ इत्युक्त्वा श्रुमुखी तारा पादयोः प्रणिपत्य तं ॥३२॥ हस्ताभ्यां चरणौ धृत्वा रुरोद भयविह्वला ॥ तामालिंग्य तदा वाली सस्नेह

॥ मिदमब्रवीत् ॥३३॥

मिलितः सख्यं च लेन चकार ॥२७॥२८॥२९॥ इति निश्चित्य परस्पर सहाय्यं प्रतिज्ञाय यातौ स्ववासस्थानमिति शेषः तस्मान्निश्चितं निश्चितार्थकं मे वचः शृणु इदानीमेवेत्यादेरम्यथेति आदि ॥३०॥३१॥

कि॰ टीका कांडं ॥३२॥३३॥

रा० कि० ८

३४ स्नेहो भविष्यति सुग्रीवतोपि मम रामकार्ये समर्थत्वादिति भावः ॥३५॥ स्वपक्षपरपक्षाभावे हेतुगर्भं विशेषणं प
रात्मन इति तेन सर्वत्र समः स इति ध्वनितं ॥३६॥ भजतः भक्तानि स्पर्धः ॥३७॥ यदि स्वयमिति असहाय इत्यर्थः ॥३८

स्त्रीस्वभावाद्बिभेषि त्वं प्रिये नास्ति भयं मम ॥ रामो यदि समायातो लक्ष्मणेन समं प्रभुः ॥३४॥ तदा रामे
ण मे स्नेहो भविष्यति न संशयः ॥ रामो नारायणः साक्षादवतीर्णोखिलप्रभुः ॥३५॥ भूभारहरणा
र्थाय श्रुतं पूर्वं मयानघे ॥ स्वपक्षः परपक्षो वा नास्ति तस्य परात्मनः ॥३६॥ आनेष्यामि गृहे साध्वि
नत्वा तच्चरणांबुजं ॥ भजतो नुभजत्येष भक्तिगम्यः सुरेश्वरः ॥३७॥ यदि स्वयं समायाति सुग्रीवो ह
न्मि तं क्षणात् ॥ यदुक्तं यौवराज्याय सुग्रीवस्याभिषेचनं ॥३८॥ कथमाहूयमानोहं सुप्स्यायरि पुरा
प्रिये ॥ शूरोहं सर्वलोकानां संमतः शुभलक्षणे ॥३९॥ भीतभीतमिदं वाक्यं कथं वाली वदेत्प्रिये ॥ त
स्माच्छोकं परित्यज्य तिष्ठ सुंदरि वेश्मनि ॥४०॥ एवमाश्वास्य तां तारां शोचंतीमश्रुलोचनां ॥ गतो वा
ली समुद्युक्तः सुग्रीवस्य वधाय सः ॥४१॥ दृष्ट्वा वालिनमायांतं सुग्रीवो भीमविक्रमः ॥ उत्पपात गगने
बद्धपुष्पमालः पतंगवत् ॥४२॥ मुष्टिभ्यां ताडयामास वालिनं सोपि तं तथा ॥ अहनद्वाली च
सुग्रीवं सुग्रीवो वालिनं तथा ॥४३॥

न कुर्यामिति शेषः यतोहं सर्वलोकानां समंतः शूरः ॥३९॥ वाली भी
तभीतं असंतभयसूचकमिदं वाक्यं कथं वदेत् ॥३९॥ कथं तदभिषेचनं ॥४०॥४१॥ उत्पपात पुप्लुयत खं सुरवमि
ति शेषः ॥४२॥ कथं तदभिषेच अहनत् हतवान् ॥४३॥

राम० ८

रामं विलोकयन् शीघ्रमेनं जहीति दृष्ट्वा सूचयत् ॥४४॥ ऐंद्रे धनुषि आगस्त्यदत्ते ऐंद्रमिति पाठे ऐंद्रास्त्राभिमंत्रि
तमित्यर्थः ॥ वृक्षखंडगः वृक्षसमूहगः ॥४५॥ तद्धृदयं लक्ष्यं कृत्वेति शेषः ॥४६॥ महीं कंपयन् स शरो रामधनुःस

रामं विलोकयन्नेव सुग्रीवो युयुधे युधि ॥ इत्येवं युध्यमानौ तौ दृष्ट्वा रामः प्रतापवान् ॥४४॥ बाणमादा
य तूणीरादैंद्रे धनुषि संदधे ॥ आकृष्य कर्णपर्यंतं अदृश्यो वृक्षखंडगः ॥४५॥ निरीक्ष्य वालिनं स
म्यक् लक्ष्यं तत्र हृदयं हरिः । उत्ससर्ज्जाशु निसमं महाबलः ॥४६॥ बिभेद स शरो वक्षो वालिनः कंप उमहावेगं न ४
यन् महीं ॥ उत्पपात महाशब्दं मुंचन् स निपपात ह ॥ तदा मुहूर्त्तं निःसंज्ञो भूत्वा चेतंमापसः ॥४७॥
ततो वाली ददर्शाग्रे रामं राजीवलोचनं ॥ धनुरालंब्य वामेन हस्तेनान्येन सायकं ॥४८॥ बिभ्राणं चीर
वसनं जटामुकुटधारिणं ॥ विशालवक्षसं भ्राजद्वनमालाविभूषितं ॥४९॥ पीनचार्वायतभुजं नव
दूर्वादलछविं ॥ सुग्रीवलक्ष्मणाभ्यां च पार्श्वयोः परिसेवितं ॥५०॥ विलोक्य शनकैः प्राह वाली रामं
विगर्हयन् ॥ किं मयापकृतं राम तव येन हतोस्म्यहं ॥५१॥ राजधर्ममविज्ञाय गर्हितं कर्म ते कृतं ॥ वृक्ष
खंडे तिरोभूत्वा त्यजता मयि सायकं ॥५२॥ यशः किं लप्स्यसे राम चौरवत्कृतसंगरः ॥ यदि क्षत्रियदा
यादो मनोर्वंशसमुद्भवः ॥५३॥

काशात् महीं शब्दं मुंचन् ॥ उत्पपात आकाश इति शेषः ततः स निपपात वा
लिवक्षसि ततस्तद्विभेद चेत्यर्थः तदा वक्षोभेदकाले चैतन्यं ॥४७॥ वामेन धनुरन्येन सायकमालंब्यास्थितमिति

रा०श्र०कि० ९

शेषः ॥ ४८ ॥ वनमालाकंठमारभ्य आजानुमाला वनमाला तया विभूषितं ॥ ४९ ॥ ५० ॥ विगर्हयन् कुत्सयन् ॥ ५१ ॥ राजधर्ममिति तिरो
भूयान्येन युद्धं कुर्वति वा एणपच्छन्नत्वान्न एज धर्म इति भावः छलवभावश्चार्षः ॥ ५२ ॥ चीरवल्कतसंगरस्त्वं मां हत्वा यशो लप्स्यसे
किं ॥ अपितु अयश एवेति भावः ॥ यदि ते क्षत्रियदायारत्वाद्यभिमानस्तदा मे मया समक्षं युद्धं कृत्वा तत्फलं यशो मरणं वा प्राप्स्यसे

युद्धं कृत्वा समसंमे प्राप्स्यसे तत्फलं तदा ॥ सुवेणकृतं किं ते मया वानकृतं किमु ॥ ५४ ॥ रावणेन हृता भार्या तव राम
महावने ॥ सुग्रीवं तारणं यातः तत्रदर्थमिति सुश्रम ॥ ५५ ॥ बतरामनजानीषे मद्बलं लोकविश्रुतं ॥ रावणं स
कुलं बध्वा ससीतं लंकया सह ॥ ५६ ॥ आनयामि मुहूर्तेन घोषदि चेच्छामि राघव ॥ धर्मिष्ठ इति लोकेस्मिन् क
थ्यसे रघुनंदन ॥ ५७ ॥ वानरं व्याधवत्कृत्वा धर्मं कं लप्स्यसे वद ॥ अभक्ष्यं वानरं मांसं हत्वा मां किं करिष्यसि ॥
५८ ॥ इत्येवं बहु भाषंतं वालिनं राघवोब्रवीत् ॥ धर्मस्य गोप्ता लोकेस्मिं अवरामि सशरासनः ॥ ५९ ॥ अधर्मका
रिणं हत्वा सद्धर्मं पालयाम्यहं ॥ दुहिता भगिनी भ्रातुर्भार्या चैव तथा स्नुषा ॥ ६० ॥ समा यो रमते तासां मे
काममपि विमूढधीः ॥ पातकी स तु विज्ञेयः स वध्यो राजभिः सदा ॥ ६१ ॥

॥ प्राप्तोभावेः अन्यायेन राजप्रयोगेण
सन्नमरणं तासूच्यते ॥ ५३ ॥ कृतं उपकृतमिति सर्पः ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ कं धर्मं को धर्मं कृतां कीर्तिं ॥ ऐहिकमपि मैमदृइत्याह
अभक्ष्यमिति ॥ ५८ ॥ इत्येवं बहुभाषंतं असंबंद्धप्रलपमिति सर्पः ॥ ५९ ॥ अधर्मेति सद्धर्मरक्षणं गत्वा दधर्मकारित्वं वधस्यन
दोषत्वमिति भावः ॥ अधर्मकारित्वं वालिनः समर्थयते दुहितेत्यादि भ्रातुः कनिष्ठस्येति शेषः ॥ ६० ॥ एताः सर्वाः समास्त

तावत्तस्य वधपर्यंतो दंड इत्याह तस्य वध्य इति ॥ ६१ ॥

स्याः तासां मध्ये यो विमूढधीरपि एकां रमते स पातकी ज्ञेयः विमूढधीरपीत्यनेनाज्ञानान्न दोष इति परिहृतं इदं शार्ष्यस्याज्ञानात्करणेपि महानेव दोषः ॥

राम ९

नन्वमनुष्याधिकारिकं शास्त्रं न तु तिर्यगादिविषयमतो निरश्चामस्माकं कोत्र दोष इति चेत् शृणु तिरश्चामनधिकारो हि अ
ज्ञानकृतः तच्चाज्ञानं न वाल्म्यादिषु स्वयंप्रतिभातवेदत्वात् देवांशत्वाच्च एवं च कर्त्तव्याकर्त्तव्यज्ञानवतामकर्त्तव्यंकरणे हि दो
षो भवत्येव अत एवेन्द्रादीनामहल्याद्यतिक्रमेण दोषश्रुतिः संगच्छते देवानां यज्ञाद्यनधिकारस्तु यजनीयदेवतान्तराभा

त्वं तु भ्रातुः कनिष्ठस्य भार्यायां रमसे बलात् ॥ अतो मया धर्मविदा हतोसि वनगोचर ॥ ६२ ॥ त्वं कपित्वान्न
जानीषे महान्तो विचरन्ति यत् ॥ लोकं पुनानाः संचारैरतस्तान्नातिभाषयेत् ॥ ६३ ॥ तच्छ्रुत्वा भयसंत्रस्तो
ज्ञात्वा रामं रमापतिं ॥ वाली प्रणम्य रभसा दम्भं वचनमब्रवीत् ॥ ६४ ॥ राम राम महाभाग जाने त्वां परमे
श्वरं ॥ अज्ञानता मया किंचिदुक्तं तत्क्षन्तुमर्हसि ॥ ६५ ॥ साक्षात्त्वच्छरघातेन विशेषेण तवाग्रतः ॥ त्य
जाम्यसून्महायोगिदुर्लभं तव दर्शनं ॥ ६६ ॥ यन्नाम विवशो गृह्णन् म्रियमाणः परं पदं ॥ याति साक्षात्स
एवाद्य मुमूर्षोर्मे पुरःस्थितः ॥ ६७ ॥ देव जानामि पुरुषं त्वां श्रियं जानकीं शुभां ॥ रावणस्य वधार्थाय जातं
त्वां ब्रह्मणार्थितं ॥ ६८ ॥ अनुजानीहि मां राम यान्तं त्वत्पदमुत्तमं ॥ मम तुल्यबलं बालं अंगदं त्वं दयां
कुरु ॥ ६९ ॥ विशल्यं कुरु मे राम हृदयं पाणिना स्पृशन् ॥ तथेति बाणमुद्धृत्य रामः पस्पर्श पाणिना ॥
॥ त्यक्त्वा तद्वानरं देहममरेन्द्रोभवत्क्षणात् ॥ ७० ॥

वात् अत एव ब्रह्मविद्यायामिन्द्रादीनामप्यधिकारः ॥ श्रुति
षु श्रूयत इत्येषोत्र भगवतोभिप्रायः ॥ ६२ ॥ किंच मन्निरयो दोषांतरभागपि त्वं जायसे इत्याह त्वं कपित्वादिति संचा

रा०अ०कि० रैलोकिं पुना नाम हांतो विचरंतियत् ॥ यतो तस्तान्नातिमायपेत् न निरेत् त्वंतु महांत एवं संचरंती तिन ज्ञानी षइत्यन्वयः विचरं
१० तिहीतिपाठांतरं एवं चत्वा दृशादृशपवित्रीकरणार्थ एवायं ममसंचार इति ध्वनितं ॥ ६३ ॥ ६४ ॥ अजानता त्वदीयंपरमेश्वर
त्वमजानतेत्यर्थः ॥ ६५ ॥ तवाग्रत इति त्वत्स्वरूपज्ञानपूर्वकं तवाग्रत इत्यर्थः तवदर्शनं त्वत्स्वरूपज्ञानं महायोगिनामदुर्लभं
६६ ॥ विवशः पुत्रादिममताक्रांतोपि साक्षात्त्वां पश्यतो म्रियमाणस्य परमपद प्राप्तिरिति किंवक्तव्यमित्यर्थः ॥ ६७ ॥ ६८
६९ ॥ अमरेंद्रो भवत् तदंशत्वात्तत्रैव लयमापेत्यर्थः ॥ ७० ॥ विमृष्टः स्पृष्टः इति पावत् ॥ परमं परं मैंद्रं पदं अधिकारांते

वालीरघूत्तमशराभिहतो विमृष्टो रामेण शीतलकरेण सुखाकरेण ॥ सद्यो विमुच्य कपिदेहमनन्यलभ्यं
प्राप्तः परं परमहंसगणैर्दुरापं ॥ ७१ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे
३ श्रीमहादेव उवाच ॥ द्वितीयः सर्गः ॥ २ ॥ निहते वालिनि रणे रामेण परमात्मना ॥ दुद्रुवुर्वानराः सर्वे किष्किंधां भयविह्वलाः ॥ १ ॥
तारामूचुर्महाभागे हतो वाली रणाजिरे ॥ अंगदं परिरक्षाद्य मंत्रिणः परिनोदय ॥ २ ॥ चतुर्द्वारकपा
टादीन् बध्वा रक्षामहे पुरीं ॥ वानराणां तु राजानमंगदं कुरु भामिनि ॥ ३ ॥
॥ मुक्तिदत्वात्तस्यापि परमपदत्वेनव्य
वहारः ॥ ७१ ॥ इति मदध्यात्मरामायणे द्वितीयः कांडः ॥ २ ॥ निहत इति ॥ १ ॥ परिनोदय नगरादिरक्षार्थमिति शेषः ॥ २ ॥ राम
चतुर्द्वारिकपाटादीनीति ॥ आदिना सूक्ष्मानेकद्वारकपाटपरिखादिसंग्रहः ॥ ३ ॥ ४ ॥ निधनं यास्यामि वह्निप्रवेशे १०
नेति शेषः ॥ ५ ॥ ६ ॥ ७ ॥ येनेति येन वाणेन वाली हतस्तेन मां जहि वालिशरीरस्पृष्टत्वेयात् त्वत्स्पर्शस्य मत्सुखावहत्वा

दितिभावः ८ ९ पत्नीदानफलमिति तेन धर्मेण तत्त्वापि पत्नीलाभो भविष्यतीति भावः वालिघातिना रामेण दापितं
वालिनेति शेषः वालिनो दारत्वं च मरणेन स्वत्वत्यागमात्रेणेति बोध्यं ॥१०॥११॥१२॥१३॥ देहजीवयोः पतित्वविकल्पना
घटस्याह पंचात्मक इति पंचभूतात्मक इत्यर्थः इदं जडत्वोपपादकं त्वङ्मांसेत्यादिनात्यंतवीभत्सत्वं दर्शितं का

निहतं वालिनं श्रुत्वा तारा शोकविमूर्छिता ॥ अताडयत्स्वपाणिभ्यां शिरो वक्षश्च भूरिशः ॥४॥ किमंगदे
न राज्येन नगरेण धनेन वा ॥ इदानीमेव निधनं यास्यामि पतिना सह ॥५॥ इत्युक्त्वा त्वरिता तत्र रुदंती
मुक्तमूर्धजा ॥ ययौ तारातिशोकार्ता यत्र भर्तृकलेवरं ॥६॥ पतितं वालिनं दृष्ट्वा रक्तैः पांसुभिरावृतं ॥
रुदती नाथ नाथेति पतिता तस्य पादयोः ॥७॥ करुणं विलपंती सा ददर्श रघुनंदनं ॥ राम मां जहि बा
णेन येन वाली हतस्त्वया ॥८॥ गच्छामि पतिसालोक्यं पतिर्मामभिकांक्षते ॥ स्वर्गेपि न सुखं तस्य मां
विना रघुनंदन ॥९॥ पत्नीवियोगजं दुःखमनुभूतं त्वयानघ ॥ वालिने मां प्रयच्छाशु पत्नीदानफलं
भवेत् ॥१०॥ सुग्रीव त्वं सुखं राज्यं दापितं वालिघातिना ॥ रामेणेह मया सार्द्धं भुंक्ष्व सापत्न्यवर्जितं
॥११॥ इत्येवं विलपंतीं तां तारां रामो महामनाः ॥ सांत्वयामास दयया तत्त्वज्ञानोपदेशतः ॥१२॥ किं भीरु शो
चसि व्यर्थं शोकस्याविषयं पतिं ॥ पतिस्तवायं देहो वा जीवो वा वद तत्त्वतः ॥१३॥

॥लेनकर्मगुणैः

सत्त्वादिभिश्चोत्पन्न इत्यनेनानश्वरत्वमेवं च तत्रात्यंतं प्रीत्ययोग्ये कात्ते पतिबुद्धिरित्यर्थः ॥ अथाप्येवं बुद्धि

रा०अ०कि० रेवतेतर्हि सोऽस्त्येवेतिग्र्यर्थः शोकइत्यर्थः ॥१४॥ नांत्यइत्याह मन्यसइति निरामयः ॥ नाशादिरहितः ॥ नदाहन्नजायतेइत्यादि
११ सर्वगतनो जीवएव अद्वितीयइति द्वितीयसंबंधरहितः तदेवाह आकाशवदलेपकइति अलिप्तइत्यर्थः मायागु
णैरितिशेषः सकथमितिअविनाशित्वादितिभावः ॥१५॥ १६ देहः काष्ठवदचितत्त्वचेतनइत्यर्थः जीवश्चिदात्म
को ज्ञानस्वरूपएवनतुसुखादिपरिणामवान् ॥ एवंसतिसुखादिसंबंधः ॥ कस्याचेतनत्वान्नस्थूलस्यसूक्ष्मस्यवा

पंचात्मकोजडोदेहस्त्वङ्मांसरुधिरास्थिमान् ॥ कालकर्मगुणोत्पन्नः सोप्यास्तेद्यापितेपुरः ॥१४॥
मन्यसेजीवमात्मानंजीवस्तर्हि निरामयः ॥ नजायतेनम्रियतेनतिष्ठतिनगच्छति ॥१५॥ नस्त्रीपुमा
न्वाषंढोवाजीवः सर्वगतोव्ययः ॥ एकएवाद्वितीयोयमाकाशवदलेपकः ॥ नित्योज्ञानमयः शुद्धः
सकथंशोकमर्हति ॥१६॥ तारा उवाच ॥ देहोचित्काष्ठवद्राम जीवोनित्यश्चिदात्मकः ॥ सुखदुः
खादिसंबंधः कस्यस्याद्राममेवद ॥१७॥ राम उवाच ॥ अहंकारादिसंबंधोयावद्देहेंद्रियैः सह ॥ सं
सारस्तावदेवस्यादात्मनस्त्वविवेकिनः ॥१८॥

॥ देहस्यवाप्यपरिणामित्वादात्मनइत्यर्थः ॥१७॥ उत्तरयतिअ राम०
हंकारादितिदेहेंद्रियैः सहतेषुइत्यर्थः ॥ अहंकारादिसंबंधं अहंममस्येवंबुद्धिविषयताइत्यर्थः प्राहस्थूल ११
सूक्ष्मदेहयोरप्यहंबुद्धिरेवकेशांचित्तुस्थूलेदेहेपुत्रादौचममताबुद्धिः सूक्ष्मेतुसर्वेषामहंबुद्धिरेवेतिविवे
कः तावदेवोविवेकिनः ॥ अंतःकरणादिनः स्वस्मिन्विवेकाग्रहवत आत्मनः संसारः स्यादित्यर्थः ॥१८॥

एवं शुद्धस्यात्मनोन्यथा विवेकोदारोपितः संसारः स्वत एव न निवर्त्तते॥ यथा स्वप्ने मिथ्यागमः स्वप्न मिथ्या पदार्थदर्शनं न
स्वतो निवर्त्तते किं तु जागरदवस्थयैव तद्वतीति भावः॥१९॥ तत्रस्वप्नस्य विषयध्यानवत्संसारस्य मूलकारणमाह
अनादीति अविद्या अनात्मन्यात्मबुद्धिर्मायावा आपार्थकः अत्यंत मिथ्याभूतः॥२०॥ मन एवेति मनोत्रांतः
करणं संसारस्तन्मूलकारणमित्यर्थः बंधः सुखादिभोगस्तद्वत् मन एव॥ मनसा समानत्वं मनसैकं तत्कृतबं
धभाक्॥ तत्कृतबंधेनात्मानं बद्धं मन्यत इत्यर्थः॥२१॥ तत्र दृष्टांतमाह॥ यथेति वस्तुतो नास्तीति अतएव तद्वि

मिथ्यारोपितसंसारो न स्वयं विनिवर्त्तते॥ विषयान् ध्यायमानस्य स्वप्ने मिथ्यागमो यथा॥१९॥
अनाद्यविद्यासंबंधात्तत्कार्याहंकृतेस्तथा॥ संसारोपार्थकोपि स्याद्रागद्वेषादिसंकुलः॥२०॥ म
न एव हि संसारो बंधश्चैव मनः शुभे॥ आत्मा मनः समानत्वमेत्य तत्कृतबंधभाक्॥२१॥ यथा विशु
द्धः स्फटिको लक्तकादिसमीपगः॥ तत्तद्वर्णयुगाभाति वस्तुतो नास्ति रंजनं॥२२॥ बुद्धीद्रियादिसा
मीप्यादात्मनः संसृतिर्बलात्॥ आत्मा स्वलिंगं तु मनः परिगृह्य तदुद्भवान्॥२३॥

(रागमेनतत्प्रतीतिरिति
भावः॥२२॥ बुद्धीति यथा लक्तकादिसामीप्यात्स्फटिकस्य रक्तत्वादिव्यवहारः एवं संसारधर्मकबुद्धीद्रियादिसामीप्यादात्म
नो बलादवशतः संसारव्यवहारो लौकिकैः क्रियत इत्यर्थः तदेवाहात्मेति मनसो जडत्वेन ज्ञानादिजनकत्वासंभावात् चे
तनस्यात्मनो लिंगमनुमापकमनोंतः करणं परिगृह्य तेनाविवेकं प्राप्य तदुद्भवान् ततो जातान् कामान्विषयान् जुष

नचेनगुणौ सदोषैरागद्वेषादिभिर्विकृदावशः
संसारेवर्त्तते २३

रा॰ अ॰ कि॰ विषयाणां मनुभवत्वं दर्शयति ॥ आदाविति गुणान् रागद्वेषादीन् ॥ ततो रागद्वेषादितः कर्मकं सष्टवदिति शेषः ॥ २४ ॥ तत्र
१२ कर्मभेदानाह शुक्लेत्यादि ॥ शुक्लं कर्माणि हिंसादिरहितजपध्यानादिरूपाणि ॥ लोहितानि हिंसामिश्रयागादीनि कृष्णा
नि पापकर्माणि तत्समानः कर्मस्वरूपतुल्या गतयो गतीः सष्टवदिति शेषः गतय इति द्वितीयार्थे प्रथमा तत्र शुक्लकर्म
णः शुक्ला ब्रह्मलोकप्राप्तिरूपोत्तमा गतिः लोहितकर्मणो मध्यमा स्वर्गगतिः कृष्णकर्मणो धमा नरकगतिरित्य

कामाननुजुषन् गुणैर्बद्धः संसारे वर्त्तते वशः ॥ आदौ मनोगुणान् सृष्ट्वा ततः कर्माण्यनेकधा ॥ २४ ॥ शुक्ल
लोहितकृष्णानि गतयस्तत्समानतः ॥ एवं कर्मवशाज्जीवो भ्रमत्याभूतसंप्लवं ॥ २५ ॥ सर्वेपि संहृतो
जीवो वासनाभिः स्वकर्मभिः ॥ अनाद्यविद्यावशगस्तिष्ठत्यभिनिवेशतः ॥ २६ ॥ सृष्टिकाले पुनः पूर्व
वासनामानसैः सह ॥ जायते पुनरप्येवं घटीयंत्रमिवावशः ॥ २७ ॥ यदा पुण्यविशेषेण लभते संगतिं स
तां ॥ मद्भक्तानां सुशांतानां तदा मद्विषया मतिः ॥ २८ ॥ मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः ॥ त
तः स्वरूपविज्ञानमनायासेन जायते ॥ २९ ॥

त्यर्थः भूतसंप्लवप्रलयस्तावत्पर्यंतं कर्मवशाद्भ्रमति ॥ २५ ॥ सर्वो राम॰
पि संहृतौ प्रलये वासनाभिः कर्मभिश्च सहाभिनिवेशतः अंतःकरणादितादात्म्याध्यासात् अंतःकरणादिप्रत १२
कृतिभूतानाद्यविद्यावशगस्तल्लीनः सन् तिष्ठति ॥ २६ ॥ वासनाश्च मानसानि कर्माणि च तैः सह तद्युक्त एव जाय
ते वर्षाकाले मंडूकवत्प्रादुर्भवति ॥ एवं सृष्टिप्रलययोर्घटीयंत्रमिवावर्त्तमानस्तिष्ठति ॥ २७ ॥ नन्वेवमस्य मुक्तिर्मात्या

श्रैवनकिंनेत्याह यदेतिमद्विषया मतिः ईश्वरो महात्मेव बुद्धिजायत इतिशेषः ॥२८॥ ततः ईश्वरविषयबुध्यनंतरं ततस्व
रूपविज्ञानं स्वरूपं विज्ञायते नेन तत्त्विषयेषु अनित्याशुचिदुःखस्वरूपताज्ञानरूपं वैराग्यं नित्यानित्यविवेकादिच जा
यते इत्यर्थः ॥२९॥ तदा तादृश वैराग्यादौ जाते । आचार्यप्रसादेन तत्त्वमस्यादिवाक्यार्थज्ञानतः श्रवणमननरूपात् क्षणा
त् उत्सवात् श्रवणादिविषयोत्साहात् पुनः पुनरनुशीलनादिति यावत् देहादिभ्यः पृथक् स्थितं सत्समानंदरूपमद्वि
तीयमात्मानं स्वात्मानुभवतः स्वात्मविषयाईदृशं ब्रह्माहमेवेत्येवंरूपान्निदिध्यासनात् ज्ञात्वा अपरोक्षीकृत्य स

तदाचार्यप्रसादेन वाक्यार्थज्ञानतः क्षणात् ॥ देहेंद्रियमनःप्राणाऽहंकृतिभ्यः पृथक्स्थितं ॥३०॥ स्वात्मा
नुभवतः सत्समानंदात्मानमद्वयं ॥ ज्ञात्वा सद्योभवेन्मुक्तः सत्यमेव मयोदितं ॥३१॥ एवं मयोदितं सम्य
गालोचयति यो निशं ॥ तस्य संसारदुःखानि न स्पृशंति कदाचन ॥३२॥ त्वमप्येतन्मया प्रोक्तमालो
चयति सुद्धधीः ॥ न स्पृश्यसे दुःखजालैः कर्मबंधाद्विमोक्ष्यसे ॥३३॥ पूर्वजन्मनि ते सुभ्रु कृता मद्भ
क्तिरुत्तमा ॥ अतस्तव विमोक्षाय रूपं मे दर्शितं शुभे ॥३४॥

द्यस्तत्कालमेव संसारान्मुक्तो भवेदित्यर्थः
३०॥३१॥ आलोचयति युक्त्या निर्णयति तस्य क्रमेण ज्ञानप्राप्त्या संसारदुःखास्पर्शः ॥३२॥ कर्मबंधात् कर्मकृतात् बंधा
त् संसाररूपादित्यर्थः ॥३३॥ मे मया स्वरूपं दर्शितं स्वरूपं दर्शितमित्यर्थः अत्र तारायै भगवान् विश्वरूपदर्शनं कारि
तमिति ध्वनयति यद्वा दर्शितमित्यस्य बोधितमित्यर्थः ॥३४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रा०अ०कि० मद्रूपंपरिदृश्यमानं। रूपंदर्शितंविश्वरूपंचआलोचयविचारयप्रवाहपतितंसंसारप्रवाहपतितंकार्यंसंसारिकं
१३ कार्यंकुर्वन्नपिनद्दोषैर्नलिप्यसइत्यर्थः॥३५॥देहाभिमानजंदेहे। अहंममेत्याकारकाभिमानाज्जातं॥३६॥जीवन्मु

ध्यात्वामद्रूपमनिशमालोचयमयोदितं॥प्रवाहपतितंकार्यंकुर्वन्नपिनलिप्यसे॥३५॥श्रीरामेणो
दितंसर्वंश्रुत्वातारातिविस्मिता॥देहाभिमानजंशोकंत्यक्त्वानत्वारघूत्तमं॥३६॥आत्मानुभवसंतु
ष्टाजीवन्मुक्ताबभूवह॥क्षणसंगममात्रेणरामेणपरमात्मना॥३७॥अनादिबंधंनिर्धूयमुक्तासापि
विकल्मषा॥सुग्रीवोपिचत्त[illegible]त्वारामवक्त्रात्समीरितं॥३८॥जहावज्ञानमखिलंस्वस्थचित्तोभ
वत्तदा॥ततःसुग्रीवमाहेदंरामोवानरपुंगवं॥३९॥भ्रातुर्ज्येष्ठस्यपुत्रेणयद्युक्तंसांपरायिकं॥कुरुसर्वं
यथान्यायंसंस्कारादिममाज्ञया॥४०॥तथेतिबलिभिर्मुख्यैर्वानरैःपरिणीयतं॥वालिनंपुष्पके
क्षिप्त्वासर्वराजोपचारकैः॥४१॥भेरीदुंदुभिनिर्घोषैर्ब्राह्मणैर्मंत्रिभिःसह॥यूथपैर्वानरैःपौरैस्ता
रयाचांगदेनच॥४२॥गत्वाचकारतत्सर्वंयथाशास्त्रंप्रयत्नतः॥स्नात्वाजगामरामस्यसमीपंमं
त्रिभिःसह॥४३॥नत्वारामस्यचरणौसुग्रीवःप्राहहृष्टधीः॥राज्यंप्रशाधिराजेंद्रवानराणांसमृ
द्धिमत्॥४४॥

॥ज्ञातदवस्थापरमात्मनारामेणसद्गुरुत्वात्क्षणसंगेनैवसापितिर्यग्योनिरपितारा अनादिबंध राम०
संसाररूपंनिर्धूयपतिरस्कृत्यविकल्मषानिःपापाकृतामुक्ताजीवन्मुक्ताचकृता॥३७॥३८॥सुग्रीवंकिमाहेत्यत्रा १३

ह॥ भ्रातुरिति ज्येष्ठस्य भ्रातुर्यत्सांपराणिकं पारलौकिकं कृत्यं तत्सुत्रेणांगदेन कुरु कारयेत्यर्थः ननु भवच्छत्रोः
कथमस्माभिः संस्कारादिकार्यं तत्राह ममाज्ञयेति ॥४०॥ तयेतीत्यस्यांगीकृत्येति शेषः परिणीय उत्थाय पुष्पके
पुष्पकविमानतुल्ये वाहने सर्वराज्योपचारवैर्युक्तं वालिनं क्षिप्त्वा ॥४१-४२॥ तत्समस्तोचितसंस्कारादि ॥४३॥ वानराणां
राज्यं प्रशाधीत्यन्वयः ॥४४॥ त्वमेवाहं ॥ अनेन त्वया क्रियमाणराज्यंभोग एव मम भोग इति सूचितं किंचानासक्तोऽ

दासोऽहं ते पादपद्मं सेवे लक्ष्मणवच्चिरं ॥ इत्युक्तो राघवः प्राह सुग्रीवं सस्मितं वचः ॥४५॥ त्वमेवाहं न संदेहः
शीघ्रं गच्छ ममाज्ञया ॥ पुरराज्याधिपत्ये त्वं स्वात्मानमभिषेचय ॥४६॥ नगरं न प्रवेक्ष्यामि चतुर्दशसमाः स
खे ॥ आगमिष्यति मे भ्राता लक्ष्मणः पत्तनं तव ॥४७॥ अंगदं यौवराज्ये त्वमभिषेचय सादरं ॥ अहं समी
पे शिखरे पर्वतस्य सहानुजः ॥४८॥ वत्स्यामि वर्षदिवसान्ततस्त्वं यत्नवान् भव ॥ किंचित्कालं पुरे स्थि
त्वा सीतायाः परिमार्गणे ॥४९॥ साष्टांगं प्रणिपत्याह सुग्रीवो रामपादयोः ॥ यदाज्ञापयसे देव तत्तथै
व करोम्यहं ॥५०॥ अनुज्ञातस्तु रामेण सुग्रीवस्तु सलक्ष्मणः ॥ गत्वा पुरीं तथा चक्रे यथा रामेण चोदितः
॥५१॥

त्वं भुंक्ष्व ईश्वरप्रेरितोऽहं राज्यं कुर्व इति मत्वा च तादृशबुध्या क्रियमाणया क्रियया भगवान् तुष्यत्येवेति ध्वनितं पुर
राज्याधिपत्ये किष्किंधापुरराज्याधिपत्ये ॥४६॥ तर्हि मदभिषेककाले तत्र संनिधानं कुर्वति चेत्तत्राह नगरमिति पत्तनं न
गरं ॥४७॥ अहं च नगरस्य समीपे पर्वतस्य शिखरे वत्स्यामीत्यन्वयः ॥४८॥ वर्षदिवसान् वर्षाकालं ततः राज्याभिषेका

नंतरं किंचित्कालं च वर्षासमयं स्वपुरे स्थित्वा सीता
याः परिमार्गणेऽन्वेषणे प्रयत्नवान् भवेत्यन्वयः ॥४९॥
॥५०॥ चोदितः प्रेरितः ॥५१॥

रा०अ०कि०
१४

५२॥५३॥गह्वरं गुहां फलमूलानि समीपगानि यस्य तत्॥५४॥मौक्तिकोपमो जलौघो जलसमूहो येषु तादृशानि पल्व
लानि यस्मिन्तादृशे पर्वत इत्यर्थः॥नानावर्णैर्मृगैः॥पक्षिभिश्च शोभिते॥५५॥इति श्रीमदध्यात्मरामायणे तृतीयः
सर्गः तत्र पर्वत इत्यर्थः॥वार्षिकदिनानि व्याप्येति शेषः अवसदित्यन्वयः॥१॥वातप्रेरितजलपूर्णमेघान् ॥अंतरे मध्ये

सुग्रीवेण यथान्यायं पूजितो लक्ष्मणस्तदा॥आगत्य राघवं शीघ्रं प्रणिपत्योपतस्थिवान्॥५२॥ततो रा
मो जगामाशु लक्ष्मणेन समन्वितः॥प्रवर्षणगिरेरूर्ध्वं शिखरं भूरिविस्तरं॥५३॥तत्रैकं गह्वरं दृष्ट्वा स्फा
टिकं दीप्तिमच्छुभं॥वर्षवातातपसहं फलमूलसमीपगं॥वासाय रोचयामास तत्र रामः सलक्ष्मणः॥
५४॥दिव्यमूलफलपुष्पसंयुते मौक्तिकोपमजलौघपल्वले॥चित्रवर्णमृगपक्षिशोभिते पर्व
ते रघुकुलोत्तमोवसत्॥पक्वमूलफलभोगतोषितो लक्ष्मणेन सहितो वसत्सुखं॥१५॥इति श्रीमदध्या
१श्रीमहादेव उवाच॥
त्मरामायणे उ०किष्किं०तृतीयः सर्गः॥३॥तत्र वार्षिकदिनानि राघवो लीलया मणिगुहासु संचरन्+
वाततुन्नजलपूरितमेघानंतरस्तनितवैद्युतगर्भान्॥वीक्ष्य विस्मयमगाद्गजयूथान्यद्वदाहितसुकां
चनकक्षान्॥२॥नवघाससमास्वाद्य हृष्टपुष्टमृगद्विजाः॥धावंतः परितो रामं वीक्ष्य विस्फारितेक्ष
णाः॥३॥
स्तनितयुक्तवैद्युतं विद्युत्समूहो गर्भे येषां तान्॥आहितसुकांचनकक्षाः रक्षास्तरणानि येषां तादृशान् गजयू
थान्यद्वत्तद्वद्वीक्ष्य विस्मयमगात्॥अत्र गजा बृंहितयुक्ता योध्याः॥अत एव स्तनिते तिनाधिकं॥२॥नवघासं तृणं वि

स्फाटिकेष्टभगजकोंऽर्धपर्वताभिमानः ३

राम
१४

तादृशाः संतो ध्याननेष्ठा मुनीश्वरं इवं न चलंति राममित्याद्युत्तरान्वयितत्रैते चरंतो मृगपक्षिगणान किंतु सिद्धगणा इत्सपरतिर्व्यं
ग्या ॥४॥ ५॥ ६॥ अनादिभूतया ऽविद्यया संभूतो जातः संशयो विगत इत्यन्वयः ॥७॥ क्रियामार्गेण लौकिक पुष्पादिभिः पूजा
रूपेण यथायत्प्रकारविशिष्टेन पूजामार्गेण योगिनो भवदाराधनं कुर्वंति तच्छ्रोतुमिच्छामीत्यन्वयः ॥८॥ इदमेव क्रियामा
र्गेण आराधनमेव योगिन एवाहुः नारद इत्यादि ॥९॥ मेमद्यं ॥१०॥११॥ द्विजत्वं उपनयनसंस्कारं प्राप्य स्त्रीतयोराराधयेदित्यनेना

न चलंति सदा ध्याननिष्ठा इव मुनीश्वराः ॥ रामं मानुषरूपेण गिरिकाननभूमिषु ॥४॥ चरंतं परमात्मानं
ज्ञात्वा सिद्धगणा भुवि ॥ मृगपक्षिगणा भूत्वा राममेवानुसेविरे ॥५॥ सौमित्रिरेकदा रामं एकांते ध्यानतत्प
रं ॥ समाधिविरमे भक्त्या प्रणया द्विनयान्वितः ॥६॥ अब्रवीद्देवतेवाक्यात् पूर्वोक्ति द्विगतो मम ॥ अनाद्यवि
द्यासंभूतः संशयो हृदि संस्थितः ॥७॥ इदानीं श्रोतुमिच्छामि क्रियामार्गेण राघव ॥ भवदाराधनं लोके य
था कुर्वंति योगिनः ॥८॥ इदमेव सदा प्राहुर्योगिनां मुक्तिसाधनं ॥ नारदोपि तथा व्यासो ब्रह्मा कमलसं
भवः ॥९॥ ब्रह्मक्षत्रादिवर्णानामाश्रमाणां च मोक्षदं ॥ स्त्रीशूद्राणां च राजेंद्र सुलभं मुक्तिसाधनं ॥१०॥
तव भक्ताय मे भ्रात्रे ब्रूहि लोकोपकारकं ॥ श्रीराम उवाच ॥ मम पूजाविधानस्य नांतोस्ति रघुनंदन ॥११॥
तथापि वक्ष्ये संक्षेपाद्यथावदनुपूर्वशः ॥ स्वगृह्योक्तप्रकारेण द्विजत्वं प्राप्य मानवः ॥१२॥

॥न्वयः ॥१२॥ पूजा
स्थानान्याह हृदय इत्यादि स्वहृदयदेश इत्यर्थः ॥ इदं च मूर्धादीनामपि स्मृत्युक्तानामुपलक्षणं ॥ अनले वह्नौ प्रतिमादौ
प्रतिमा स्वर्णरूप्यादिमयी आदिना ब्राह्मणे विना वसौ सूर्यमंडले अर्चेत् पूजयेत ॥१३॥ प्रातः स्नानमिति संकल्प मातः

कृत्योपलक्षणं॥१४॥ वेदेति द्विजोवेदोदितैः सूक्तादिसंत्रोदितैः मलेपनं सकलस्नानविधेरुपलक्षणं तेन स्नानं कुर्वीतेत्यन्वयः संध्यादि अग्निहोत्रादिनाहोमतर्पणादि॥१५॥ ममपूजकोमद्बुध्या भक्त्या स्वगुरुं पूजयेदित्यन्वयः अत्र गुर्वर्चसांनिध्येपि ध्यानेन जलादौ गुरुं पूजयेदिति संप्रदायः॥१६॥ शिलायां शिलानिर्मितप्रतिमायां प्रतिमासु मृन्मय्यादिनिर्मितास्वित्यर्थः प्रसिद्धैः स्मृतिप्रसिद्धैः तेन तत्तद्विशिष्टपुष्पादिपूजानर्हमिति सूचितं॥ तेच निषेधानिबंधेषु द्रष्टव्या विस्तरभयान्नेह लि

सकाशात्सद्गुरोर्मंत्रं लब्ध्वा मद्भक्तिसंयुतः॥ तेन संदर्शितविधिर्मामेवाराधयेत्सुधीः॥१३॥ हृदये वानले वार्चेत्प्रतिमासु विभावसौ॥ शालिग्रामशिलायां वा पूजयेन्मामतंद्रितः॥१४॥ प्रातः स्नानं प्रकुर्वीत प्रथमं देहशुद्धये॥ वेदतंत्रोदितैर्मंत्रैर्मृल्लेपनविधानतः॥१५॥ संध्यादिकर्म यन्नित्यं तत्कुर्याद्विधिनाबुधः॥ संकल्पमादौ कुर्वीत सिध्यर्थं कर्मणां सुधीः॥ स्वगुरुं पूजयेद्भक्त्या मद्बुध्या पूजको मम॥१६॥ शिलायां स्नपनं कुर्यात्प्रतिमासु प्रमार्जनं॥ प्रसिद्धैर्गंधपुष्पाद्यैर्मत्पूजासिद्धिदायिका॥१७॥ अमायिकोनुवृत्त्या मां पूजयेन्नियतव्रतः॥ प्रतिमादिष्वलंकारः प्रियो मे कुलनंदन॥१८॥ अग्नौ यजेत हविषा भास्करे स्थंडिले यजेत्॥ भक्तेनोपहृतं प्रीत्यै श्रद्धया मम वार्यपि॥१९॥

खिताः॥१७॥ अमायिकः मायादंभादिरहितः अनुवृत्त्या गुरूपदिष्टमार्गानुवर्त्तनेन प्रतिमादिषु प्रतिमाश्चेते आदयश्च प्रतिमादयः प्रतिमादिषु प्रतिमारूपेषु पूजाधिकरणेषु इत्यर्थः तत्पुरुषः समानाधिकरणः कर्मधारयः प्रतिमारूपेष्वाश्रयेषु आदिशब्द आश्रयवाची नीलादिश्च सुयोधनइत्यादौ प्रसिद्धः अलंकारः पुष्पादिरूपः॥१८॥ आधारांतरे पूजाविशेषमाह

गाविति॥ अग्नौ तत्तद्देवता मंत्रेण होम एव तत्तद्देवता पूजेत्यर्थः भास्करे स्थंडिले यजेदिति भास्करे याज्ञेदि

तिपत्र। तत्तदाकारे स्थंडिले इत्यर्थः भक्तेन श्रद्ध
योपहृतं वार्यपि मम प्रीत्यै भवतीति शेषः अनेन
भक्तेरेव मुख्यत्वं दर्शितं॥१९॥

भक्ष्यादिकमुपहृतं मम प्रीत्यै इति किं पुनर्वक्तव्यमित्यर्थः समारभेत् पूजामिति शेषः ॥२०॥ तत्र पूजाप्रकारमाह चैलेति अधः
कुशासनं तदुपर्यजिनं तदुपरि चैलमिति क्रमः । तत्रोपविश्य पद्मासनाद्यन्यतमासनेनेत्यर्थः देवस्य संमुखं इत्यनेन स्थि
रासु प्रतिमासु पश्चिमाद्यभिमुखतयापि पूजा भवतीति सूचितं ॥२१॥ मातृका अकारादिपंचाशद्वर्णात्मिका तन्न्या
समकारस्य तंत्रे च स्फुटः वहिरिति वहिर्न्यासमांतरन्यासं चेत्यर्थः केशवादि चतुर्विंशतिनामभिरित्यर्थः सचना

किं पुनर्भक्ष्यभोज्यादि गंधपुष्पाक्षतादिकं ॥ पूजाद्रव्याणि सर्वाणि संपाद्यैवं समारभेत् ॥२०॥ चैला
जिनकुशैः सम्यगासनं परिकल्पयेत् ॥ तत्रोपविश्य देवस्य संमुखे शुद्धमानसः ॥२१॥ ततो न्यासं प्र
कुर्वीत मातृकाबहिरांतरं ॥ केशवादि ततः कुर्यात्तत्वन्यासं ततः परं ॥२२॥ मन्मूर्त्तिपंजरन्यासं मंत्र
न्यासं ततो न्यसेत् ॥ प्रतिमादावपि तथा कुर्यान्नित्यसमंतदितः ॥२३॥ कलशं स्वपुरो वामे क्षिपेत्पुष्पादि दक्षि
णे ॥ अर्घ्यपाद्यप्रदानार्थं मधुपर्कार्थमेव च ॥२४॥ तथैवाचमनार्थं तु न्यसेत्पात्रचतुष्टयं ॥ हृत्पद्मे भानु
विमले मत्कलां जीवसंज्ञितां ॥२५॥

॥२द पंचरात्रादौ स्पष्टः ॥२२॥ तत्त्वन्यासोपि तंत्रे वोक्तः मन्मूर्त्तिपंजरन्यासो
विष्णुपंजरस्तोत्रोक्तन्यास इति संप्रदायः मंत्रन्यासं मंत्रवर्णैस्तत्कल्पोक्तं षडंगादिन्यासं प्रतिमादावपीति यथा
त्मनि तथा देवे इत्युक्तेः ॥२३॥ ईषद्वामभागावच्छिन्नपुरोभागे कलशं जलपूर्णं स्थापयेदिति शेषः पुष्पादि दक्षिणे क्षि
पेत् स्थापयेदित्यर्थः अर्घ्यादिपात्रस्थापनदेशः स्मृतावुक्तः । अर्घ्यपात्रं तु वायव्ये नैरृत्यां पाद्यपात्रकं मध्ये तु म

ए० अ० कि० ९६

धुपर्कं स्यादेशेत्वाचमनीयकमिति ॥२४॥ जीवसंज्ञितां मत्कलामित्यनेन चेतनः सर्वत्रैक्त एवेति वोधितं युक्तं चैतत्
व्यापकेनैव चेतनोपपत्ताव नेकतत्काल्पनायां मानाभावात् ॥ प्रतिकर्मव्यवस्थात्वंतः करणभेदेनैवोपपन्नेति
हृत्पद्मे तां ध्यायेत् तया च व्याप्तमखिलस्वदेहं भावयेत् तथा भावयित्वा तामेव मत्कलां प्रतिमादिष्वावाहयेत्
तदावाहनेन तामपि चेतनत्वेन ध्यात्वा ॥२५॥ २६ ॥ यावछक्त्यैरुपचारैर्वा षोडशभिः पंचभिर्वा तैः पाद्यपूरणार्घ्यः अमा
यया श्रद्दंभादिना मां पूजयेत् ॥२७॥ विभवे सतिकर्पूरादिभिः सुगंधपुष्पैश्च मंत्रवदर्चयेत् ॥२८॥ आगमोक्तां श्र

ध्यायेत्स्वदेहमखिलं तया व्याप्तमरिंदम ॥ तामेवावाहयेन्नित्यं प्रतिमादिषु मत्कलां ॥२६॥ पाद्या
र्घ्याचमनीयाद्यैः स्नानवस्त्रविभूषणैः ॥ यावछक्त्योपचारैर्वा त्वर्चयेन्मामममायया ॥२७॥ विभवे
सतिकर्पूरकुंकुमागरुचंदनैः ॥ अर्चयेन्मंत्रवन्नित्यं सुगंधकुसुमैः शुभैः ॥२८॥ दशावरणपूजां
वैह्यागमोक्तां प्रकारयेत् ॥ नीराजनैर्धूपदीपैर्नैवेद्यैर्बहुविस्तरैः ॥२९॥ अरूपोपहरेन्नित्यं श्र
द्धाभुग् हमीश्वरः ॥ होमं कुर्यात्प्रयत्नेन विधिना मंत्रकोविदः ॥३०॥ अगस्त्येनोक्तमार्गेण कुंडे नागम
वित्तमः ॥ जुहुयान्मूलमंत्रेण पुंसूक्तेनाथवा बुधः ॥३१॥

अगस्त्यसंहितोक्तां प्रकारयेत् प्रकुर्वीतेत्यर्थः
नीराजनैरितिपाठक्रमादर्थक्रमस्य बलवत्वाद्धूपदीपनैवेद्यनीराजनानीति क्रमः नीराजनं पंचारात्रिकादि
भिः ॥२९॥ तद्रूपादि अरूपोपहरेद् द्यात् ॥ यतोहं श्रद्धाभुक् अश्रद्धादत्तभोक्ता ॥३०॥ अगस्त्येनेति अगस्त्यसहि
तोक्तमार्गेणकृतं यत्कुंडेन तस्मिन्नित्यर्थः अधिकरणस्य करणत्वविवक्षया तृतीया मूलमंत्रेण आगमोक्ते

नपुंसकेन पत्नज्ञाशणविषवं ॥३१॥

एम० ९६

तद्विषये एवाहाथर्वोपासनाग्नाविति चरुणा हविषाहवीरूपेण चरुणा ॥३२॥ ध्यायेन्मामिति शेषः पार्षदेभ्यः तंत्रो
क्तेहनूमदादिभ्यः ॥३३॥ मां ध्यायन्नू स्मरन्नित्यस्यमनुवर्णोनितिशेषः तदेवाहयतवामिति । अनेनप्रशस्ततरो मान
सोजपउक्तः मुखवासं तद्रूपकर्पूरादियुक्तं तांबूलं दत्वेत्यर्थः ॥३४॥ मदर्थे मत्प्रीतमर्यस्यार्थः कारयेत् कुर्वीतिसर्थः
निहत्तप्रेषणाणि च दंडवदित्यनेनाष्टांगप्रणाम उक्तः ॥३५॥ भावनामयं मद्दत्तं प्रसादं शिरसि आधायस्थापयि
त्वा अनेनमह्यं प्रसादं पुष्पादिरूपं भगवान् ददातीति भावनया प्रसादं गृह्णीयादिति सूचितं तं गृहीत्वा शिर

अथर्वोपासनाग्नौवाचरुणा हविषा तथा ॥ तप्तजांबूनदप्रख्यं दिव्याभरणभूषितं ॥३२॥ ध्यायेदन
न्तमध्यस्थं होमकाले सदा बुधः ॥ पार्षदेभ्यो बलिं दत्वा होमशेषं विशेषतः ॥३३॥ ततो जपं प्रकुर्वीत
ध्यायन्मां यतवाक् स्मरन् ॥ मुखवासं च तांबूलं दत्वा प्रीतिसमन्वितः ॥३४॥ मदर्थे नृत्यगीतादि स्तुति
पाठादि कारयेत् ॥ प्रणमेद्दंडवद्भूमौ हृदये मां निधाय च ॥३५॥ शिरस्याधाय मद्दत्तं प्रसादं भावनामयं ॥
पाणिभ्यां मत्पदे मूर्ध्नि गृहीत्वा भक्तिसंयुतः ॥३६॥

सि आधायस्थापयित्वा ॥ अनेनमह्यं प्रसादं पुष्पादिरूपं
भगवान् ददातीति भावनया प्रसादं गृह्णीयादिति सूचितं भावनामयं मद्दत्तं प्रसादं शिरसि आधायस्थाय गृहीत्वा शि
रसिस्थापयित्वा भावनाभाविते मत्पदे पाणिभ्यां स्वमूर्ध्नि गृहीत्वा ॥३६॥ इत्युक्त्वा प्रणमेदित्यन्वयः मत्सज्योति
प स्वहृदंस्थे । यत एव ध्याता जीवकलामतिमायामावाहिता पूर्वं तत्रैवोद्वासयेत् । तत्रैव प्रविष्टं ध्यायेत् एतदेव वि

रा०अ०कि० सर्जनं ॥३७॥ इहामुत्र च ऐहिलौकिकीं पारलौकिकीं चेत्सर्पः ॥३८॥ मद्भक्तो यदि मामेवं ध्यात्वा आवाह्य च दिने दिने प्रतिदि
१७ नं मम पूजां करोति तदा मम सारूप्यं प्राप्नोति ॥३९॥ सनातनं पूर्वपूर्वैरप्येवमेवानुष्ठितं ॥४०॥ शेषांशाय लक्ष्मणाय ॥४१॥
प्राकृतवत् प्रकृतिकार्यं मनुष्यवत् मायामालंब्य दुःखित इत्यनेन स्वतस्तस्य दुःखलेशोपि नेति सूचितं ॥४२॥ एकां
तं इति मंत्रत्वादेकांते कथनं ॥४३॥ अनुत्तमः न विद्यते उत्तमं यस्मादित्सर्पः ॥४४॥ उपकारमेवाह त्वत्कृत इति ॥४५॥

१ षि

रक्ष मां घोरसंसारादित्युक्त्वा प्रणमेत्सुधीः ॥ उद्वासयेद्यथापूर्वं प्रत्यग्ज्योतिं संस्मरन् ॥३७॥ एवमुक्त
प्रकारेण पूजयेद्विधिवद्यदि ॥ इहामुत्र च संसिद्धिं प्राप्नोति मदनुग्रहात् ॥३८॥ मद्भक्तो यदि मामेवं पू
जां चैव दिने दिने ॥ करोति मम सारूप्यं प्राप्नोत्येव न संशयः ॥३९॥ इदं रहस्यं परमं च पावनं मयैव सा
क्षात्कथितं सनातनं ॥ पठत्यजस्रं यदि वा शृणोति यः स सर्वपूजाफलभाङ् न संशयः ॥४०॥ एवं परा
त्मा श्रीरामः क्रियायोगमनुत्तमं ॥ पृष्टः प्राह स्वभक्ताय शेषांशाय महात्मने ॥४१॥ पुनः प्राकृतवत्प्र
भो मायामालंब्य दुःखितः ॥ हा सीतेति वदन्नैव निद्रां लेभे कथंचन ॥४२॥ एतस्मिन्नंतरे तत्र किष्किंधा
यां सुबुद्धिमान् ॥ हनूमान् प्राह सुग्रीवं एकांते कपिनायकं ॥४३॥ शृणु राजन् प्रवक्ष्यामि तवैव हित
मुत्तमं ॥ रामेण ते कृतः पूर्वमुपकारो ह्यनुत्तमः ॥४४॥ राम० १७

॥ दुर्लभां तारामिति वालिपरिग्रहीं स्वयां सर्वथा का
मिभावेन द्रष्टुमप्यशक्यामित्सर्पः ॥४६॥ एकाग्र्यं तन्मात्रचित्तत्वं यथा भवति तथा ॥ इष्यते कार्यस्य सीतान्वेष

णमुचितमितिव्यंग्यं॥ ४८॥ ४९॥ वानराणां मदीनां कुरु बोधय॥ ५०॥ ख्याताम् आह सखेति॥ ५१॥ इत्याज्ञाप्य एवं वानरे
षु कर्त्तव्यामाज्ञां बोधयित्वा॥ ५२॥ ५३॥ अगणिता गुणाः सत्वं पराक्रमश्च येषां तान् पर्वताकारसदृशे रूपमाका

कृतघ्न वल्लयानूनं विस्मृतः प्रतिभाति मे॥ त्वत्कृते निहतो वाली वीरस्त्रैलोक्यसंमतः॥ ४५॥ राज्ये प्रतिष्ठितो
सि त्वं तारां प्राप्तोसि दुर्लभां॥ स रामः पर्वतस्याग्रे भ्रात्रा सह वसन् सुधीः॥ ४६॥ त्वदागमनमेकाग्रमीक्ष
ते कार्यगौरवात्॥ त्वं तु वानरभावेन स्त्रीसक्तो नावबुध्यसे॥ ४७॥ करोमीति प्रतिज्ञाय सीतायाः परिमार्ग
णं॥ न करोषि कृतघ्नस्त्वं हन्यसे वालिवत् ध्रुवं॥ हनूमद्वचनं श्रुत्वा सुग्रीवो भयविह्वलः॥ प्रत्युवाच हनू
मंतं सत्यमेवत्वयोदितं॥ ४९॥ शीघ्रं कुरु मदाज्ञां त्वं वानराणां तरस्विनां॥ सहस्राणि दशैतानि प्रेषया
शु दिशो दश॥ ५०॥ सप्तद्वीपगतान् सर्वान् वानरानानयंतु ते॥ पक्षमध्ये समायांतु सर्वे वानरपुंग
वाः॥ ५१॥ ये पक्षमतिवर्त्तंते ते वध्या मे न संशयः॥ इत्याज्ञाप्य हनूमंतं सुग्रीवो गृहमाविशत्॥ ५२॥
सुग्रीवाज्ञां पुरस्कृत्य हनूमान्मंत्रिसत्तमः॥ तत्क्षणे प्रेषयामास हरीन् दश दिशः सुधीः॥ ५३॥ अ
गणित गुणसत्वान्वायुवेगप्रचारान्॥ वनचरगणमुख्यान् पर्वताकाररूपान्॥ पवनहितकुमारः
प्रेषयामास दूतानति रभसतरात्मा दानमानादितृप्तान्॥ ५४॥
॥ रेयेषां तान् पवनस्य वायोर्हितो तितिप्रियः
कुमारो हनूमान् दानादितृप्तानित्यनेना वश्यं कार्यसिद्धिकरत्वं दर्शितं॥ ५४॥

रा॰ अ॰ कि॰ इति अध्या॰ किष्किं॰ चतुर्थः सर्गः ॥४॥ राम स्त्विति पर्वताग्रस्थिते मणियुक्तसानौ शिखरे ॥१॥ न ज्ञानेन शक्नोमी सर्पः
१८ २॥४॥ वसंतीत्वं कथं प्राणान्धरिष्यसीत्यन्वयः ॥५॥ विरहदुःखमभिनयति चंद्रोपी तिभानुवत् दाहकत्वात् ६ चं

इति श्रीमदध्या॰ उमा॰ म॰ चतुर्थः सर्गः ॥४॥ रामस्तु पर्वतस्याग्रे मणिसानौ निशामुखे ॥ सीता वि
रहजं शोकमसहन्निदमब्रवीत् ॥१॥ पश्य लक्ष्मण मे सीता राक्षसेन हृता बलात् ॥ मृता ऽमृता वा
निश्चेतुं न जाने द्यापि भामिनी ॥२॥ जीवतीति मम ब्रूयात्कश्चित्प्रियकृत्तमः ॥ यदि जानामि तां साध्वीं
जीवंतीं यत्र कुत्र वा ॥३॥ हठाद्वाहरिष्यामि सुधामिव पयोनिधेः ॥ प्रतिज्ञां शृणु मे भ्रातर्येन मे जनका
त्मजा ॥४॥ नीता तं भस्मसात्कुर्यां सपुत्रबलवाहनं ॥ हा सीते चंद्रवदने वसंती राक्षसालये ॥ दुःखार्त्ता
मामपश्यंती कथं प्राणान्धरिष्यसि ॥ चंद्रोपि भानुवद्भाति मम चंद्राननां विना ॥६॥ चंद्र त्वं जानकीं
स्पृष्ट्वा करैर्मां स्पृश शीतलैः ॥ सुग्रीवोपि दयाहीनो दुःखितं मां न पश्यति ॥७॥ राज्यं निष्कंटकं प्राप्य
स्त्रीभिः परिवृतो रहः ॥ कृतघ्नो दृश्यते व्यक्तं पानासक्तोतिकामुकः ॥८॥ नायाति शरदं पश्यन्नपि मा
र्गयितुं प्रियां ॥ पूर्वोपकारिणं दुष्टः कृतघ्नो विस्मृतो हि मां ॥९॥ हन्मि सुग्रीवमप्येवं सपुरं सहबांधवं ॥
वाली यथा हतो मेद्य सुग्रीवोपि तथा भवेत् ॥१०॥

१ श्रीमहादेव

॥ स्त्वमिति कर्पूरतोप्यति शीतस्पर्शमकाम दुःख प्रीत
कस्य तत्र गात्रस्पर्शेति वकरः अपि तथा गुणशीलयुक्ता भूत्वा मां सुखयिष्यतीति भावः विरहवेदनाऽसत्वादेव

रा॰ म॰
१८

सुग्रीवं निहति सुग्रीवोपीति ॥७॥ यन्मां न पश्यति तत्कृतघ्नः सख्यदृश्यते ॥८॥ कृतघ्नत्वमुपपादयति नायातीति ॥९॥ एवं य
द्या सीताहर्त्तारं हंतुमिच्छामि एवमित्यर्थः अद्य यथाहमेनं यथा वाली हतः तथा सुग्रीवोपि हतो भवेदिति शेषः ॥१०
रुष्टं क्रोधवंतं इदानीमेवेत्याद्युक्त्वा राजाज्ञां विनेदृशकार्यकरणमनुचितमिति प्रतिसंधायाह मामाज्ञापयेति इद

इति रुष्टं समालोक्य राघवं लक्ष्मणोऽब्रवीत् ॥ इदानीमेव गत्वाहं सुग्रीवं दुष्टमानसं ॥११॥ मा माज्ञापय ह
त्वा तं मायास्ये राम तेंतिकं ॥ इत्युक्त्वा धनुरादाय खड्गं तूणीरमेव च ॥१२॥ गंतुमभ्युद्यतं वीक्ष्य रामो
लक्ष्मणमब्रवीत् ॥ न हंतव्यस्त्वया वत्स सुग्रीवो मे प्रियः सखा ॥१३॥ किंतु भीषय सुग्रीवं वालीवत्त्वं
हनिष्यसे ॥ इत्युक्त्वा शीघ्रमादाय सुग्रीवं प्रतिभाषितं ॥१४॥ आगत्य पश्चाद्यत्कार्यं तत्करिष्याम्यसं
शयं ॥ तथेति लक्ष्मणोऽगच्छत्त्वरितो भीमविक्रमः ॥१५॥ किष्किंधां प्रति कोपेन निर्दहन्निव वानरान् ॥
सर्वज्ञो निःसलक्ष्मीको विज्ञानात्मापि राघवः ॥१६॥ सीतामनुशुशोचार्त्तः प्राकृतः प्राकृतामिव ॥ बुध्या
दिसाक्षिणस्तस्य मायाकार्यातिवर्त्तिनः ॥१७॥ रागादिरहितस्यास्य तत्कार्यं कथमुद्भवेत् ॥ ब्रह्मणो
क्तं कृतं कर्त्तुं राज्ञो दशरथस्य हि ॥१८॥

॥शेष्यले प्रथमतोऽप्रतिसंधानं तु रामरोषेण लक्ष्मणस्यापि रोषात्
विषत्वात् ॥ अतो गर्भितं तं न दोषः ॥११॥१२॥१३॥ वालिवत्त्वं हनिष्यस इत्युक्त्वा भीषयेस्त्वं यः नेति काकुः ततः सुग्री
वं प्रतिभाषितं तत्कृत्तोत्तरं आदाय ॥१४॥ अत्रागत्य मां श्रावयेदिति शेषः तच्छ्रुत्वा पश्चाद्यत्कार्यं कर्त्तुं योग्यं तत्क
रिष्यामि आगच्छेदिति छेदः ॥१५॥ किष्किंधां प्रत्यगच्छदित्यन्वयः निःसलक्ष्मीकः ॥ अविभक्तात्मनामकमायाशक्तिः

रा०अ०कि० तत्संबंधादेव सर्वज्ञः स्वतस्तु विज्ञानात्मा निर्विषयज्ञानस्वरूपोपि ॥१६॥ सीतामनुशुशोचेति विरोधः प्राकृतोज्ञोज
१९ नः प्राकृतां संयोगवियोगप्रणालिनीं ॥ तत्र शंकते बुध्येत्यादिना कथमुभयवेदित्यंते न मायाकार्यातिवर्त्तिनः तदस्य
दुःख ॥१७॥ अत एव रागादिरहितस्य समाधत्ते ब्रह्मणेति ॥ ब्रह्मप्रार्थित एवएवंविधफलकावतरणं कृतं सत्संक
र्तुं जातः फलांतरमप्याह राज्ञस्तपःफलदानाय च ॥१८॥ मानुषवेषधृक् जातः एवं च तद्देषनिर्वाहाये वैवं चे
ष्टाकरणमिति भावः फलांतरमपि तथा व्यवहरणस्याह माययेति मोहितेत्वा देवास्तान संयुताः ॥१९॥ प्रथममपि
तुं विस्तारयितुं ॥२०॥ मानुषचेष्टकमनुष्यसदृशचेष्टाकर्त्ता लोकानां क्रोधादिकलिकस्य व्यवहारस्य सिद्धये ज्ञाना

तपसः फलदानाय जातो मानुषवेषधृक् ॥ मायया मोहिताः सर्वे जना अज्ञानसंयुताः ॥१९॥ कथ
मेषां भवेन्मोक्ष इति विष्णुर्विचिंतयन् ॥ कथां प्रथयितुं लोके सर्वलोकमलापहां ॥२०॥ रामायणाभि
धां रामो भूत्वा मानुषचेष्टकः ॥ क्रोधं मोहं च कामं च व्यवहारार्थसिद्धये ॥२१॥ तत्तत्कालोचितं गृ
ह्णन् मोहयत्यवशाः प्रजाः ॥ अनुरक्त इवाशेषगुणेषु गुणवर्जितः ॥२२॥ विज्ञानमूर्त्तिर्विज्ञानशक्तिः
साक्ष्यगुणान्वितः ॥ अतः कामादिभिर्नित्यमविलिप्तो यथा नभः ॥२३॥

९पार्थस्य तत्फलस्य सिद्धये ॥२१॥
तत्तत्कालोचितं व्यवहारं गृह्णन् व्यवहरन् प्रजा मोहयति रामोप्येवं व्यवहृतवान् तस्मादेवं व्यवहारो मुक्त राम०
इति बोधयति मोहकत्वं चास्य निवृत्तिमार्गविपरीतत्वेन गुणवर्जितोपि अशेषगुणेषु शत्रुवधकांतानुरागा १९
दिषु अनुरक्त इव तत्तद्व्यवहरन् ॥ अत एव मोहयति ॥२२॥ कामाद्यलिप्तत्वमेव हेतुपूर्वं निरूपयति विज्ञा

नेति । स्वयंविज्ञानमूर्त्तिस्तद्घनः तया विज्ञानरूपैव शक्तिर्यस्य । तेन शक्तिसंसर्गकृतो न्यथाभावो वारितः अत ए
व सर्वप्राणिनां शुभाशुभसाक्षी विशिष्टज्ञानशक्तित्वात् । अगुणान्वितः गुणान्वितभिन्नः निर्गुण इत्ययावत्
अतद् इति स्पष्टं ॥ यथा नभो वायुनीति मलालिप्तं तद्वत् ॥ २३ ॥ नन्वेवंभूतो स्माभिर्न गृह्यते किं तत्राह विंदंतीति के

विंदंति मुनयः केचिज्जानंति सनकादयः ॥ तद्भक्ता निर्मलात्मानः सम्यग्जानंति नित्यदा ॥ २४ ॥ भ
क्तचित्तानुसारेण जायते भगवानजः ॥ लक्ष्मणोपि तदा गत्वा किष्किंधानगरांतिकं ॥ २५ ॥ ज्याघो
षमकरोत्तीव्रं भीषयन्सर्ववानरान् ॥ तं दृष्ट्वा प्राकृतास्तत्र वानरा वप्र[illegible] मूर्धनि ॥ २६ ॥ चक्रुः कि
लकिलाशब्दं धृतपाषाणपादपाः ॥ तान्दृष्ट्वा क्रोधताम्राक्षो वानरान्लक्ष्मणस्तदा ॥ २७ ॥ नि
र्मूलान्कर्तुमुद्युक्तो धनुरानम्य वीर्यवान् ॥ ततः शीघ्रं समापस्य ज्ञात्वा लक्ष्मणमागतं ॥ २८ ॥ नि
वार्य वानरान्सर्वानंगदो मंत्रिसत्तमः ॥ [illegible]गत्वा लक्ष्मणसामीप्यं प्रणनाम सदंडवत् ॥ २९ ॥ ततोंगदं
परिष्वज्य लक्ष्मणः प्रियवर्धनः ॥ उवाच वत्स गच्छ त्वं पितृव्याय निवेदय ॥ ३० ॥ मामागतं राघवे
ण चोदितं रौद्रमूर्त्तिना ॥ तथेति त्वरितं गत्वा सुग्रीवाय न्यवेदयत् ॥ ३१ ॥

॥ चिद्देव सनकादयो मुनयो
जानंति श्रुतिवाक्यैर्विंदंति लभंते अपरे तु तथापि साक्षात्कुर्वंतीति यावत् तत्किमन्येन जानंत्येव सर्वेष्वा
नेत्याह ॥ तद्भक्ता इति ईदृशाः सम्यग्जानंत्येवेति भावः ॥ २४ ॥ तत्र हेतुमाह भक्तेति जायते ज्ञानविषयो जायत

इत्यर्थः ॥ २५ वप्रं प्राकारः ॥ २६ ॥ किल किल शब्दो वानराणां क्रोधभयादिकलिका शब्दः ॥ २७ ॥ समापत्य गृहीत्वा लित्वा ॥ २८
लक्ष्मणसामीप्यं गत्वा प्राप्य ॥ २९ ॥ प्रियवर्धनः प्रियाणां वृद्धिकरणशीलः ॥ ३० ॥ रौद्रमूर्त्तिना बलिवधकालिकमूर्त्ति
सदृशमूर्त्तिना ॥ ३१ ॥ लक्ष्मणो बहिः स्थित इति निवेदयत इत्यन्वयः ॥ ३२ ॥ लक्ष्मणं तन्निकटं ॥ ३३ ॥ कोपि तं संजातकोपं सं

लक्ष्मणः क्रोधताम्राक्षः पुरद्वारि बहिः स्थितः ॥ तच्छ्रुत्वातीव संत्रस्तः सुग्रीवो वानरेश्वरः ॥ ३२ ॥ आहू
य मंत्रिणं श्रेष्ठं हनूमंतमथाब्रवीत् ॥ गच्छ त्वमंगदेनाशु लक्ष्मणं विनयान्वितः ॥ ३३ ॥ सांत्वयन् कोपि
तं वीरं शनैरानय मंदिरं ॥ प्रेषयित्वा हनूमंतं तारामाह कपीश्वरः ॥ ३४ ॥ त्वं गच्छ सांत्वयंती तं लक्ष्मणं
मृदुभाषितैः ॥ शांतमंतःपुरं नीत्वा पश्चाद्दर्शय मेनघे ॥ ३५ ॥ भवत्विति ततस्तारा मध्यकक्षं समावि
शत् ॥ हनूमानंगदेनैव सहितो लक्ष्मणांतिकं ॥ ३६ ॥ गत्वा ननाम शिरसा भक्त्या स्वागतमब्रवीत् ॥ ए
हि वीर महाभाग भवद्गृहमशंकितं ॥ ३७ ॥ प्रविश्य राजदारादीन् दृष्ट्वा सुग्रीवमेव च ॥ यदाज्ञापय
से पश्चात्तत्सर्वं करवाणि भो ॥ ३८ ॥ इत्युक्त्वा लक्ष्मणं भक्त्या करेण गृह्य समारुतिः ॥ आनयामास
नगरमध्याद्राजगृहं प्रति ॥ ३९ ॥
॥ त्वयन् सामावंतं कुर्वन् मंदिरमानय प्रापय ॥ ३४ ॥ मृदुभाषितैः सांत्वयंती
लक्ष्मणं प्रति गच्छ ततः शांतं शांतकोपं कृत्वा ततोंतःपुरं नीत्वा अनेनास्यंत मित्रता प्रदर्शनिमे मां दर्शय ॥ ३५ ॥ मध्य
कक्षं स्त्रीणां संचारमर्यादास्थलं ॥ ३६ ॥ अशंकितमेहि यत इदं भवत् गृहं ॥ ३७ ॥ राजदारादीन् दृष्ट्वेत्यनेन सेवक

दारदर्शने यथा राज्ञो न संकोचस्तथा स्मराज
दारदर्शने तव संकोचो नोचित इति भावः ॥ ३८ ॥
गृहे साधी ॥ ३९ ॥

यूथपानां महासौधानगृहानि स्पर्धः ॥४०॥ ताराधिपाननां चंद्रमुखी ॥४१॥ आदौ स्वस्य सेवकत्वात् लक्ष्मणस्य भगवदव
तारत्वाच्च नत्वा पश्चान्मित्रभावेन देवरे स्तुतिः त्वं साधुर्भक्तवत्सलोतो भक्ते चैदृशः कोपोनुचित इति भावः ॥४२

पश्यंस्तत्र महासौधान् यूथपानां समंततः ॥ जगाम भवनं राज्ञः सुरेंद्रभवनोपमं ॥४०॥ मध्यकक्ष्येगता
तत्र तारा ताराधिपानना ॥ सर्वाभरणसंपन्ना मदरक्तांतलोचना ॥४१॥ उवाच लक्ष्मणं नत्वा स्मित
पूर्वाभिभाषिणी ॥ याहि देवर भद्रं ते साधुस्त्वं भक्तवत्सलः ॥४२॥ किमर्थं कोपमाकार्षीर्भक्ते भृत्ये
कपीश्वरे ॥ बहुकालमनाश्वासं दुःखमेवानुभूतवान् ॥४३॥ इदानीं बहुदुःखौघाद्भवद्भिरभिर
क्षितः ॥ भवत्प्रसादात्सुग्रीवः प्राप्तसौख्यो महामतिः ॥४४॥ कामासक्तो रघुपतेः सेवार्थं नागतो
हरिः ॥ आगमिष्यंति हरयो नानादेशगताः प्रभो ॥४५॥ प्रेषिता दशसाहस्रा हरयो रघुसत्तम ॥ आ
नेतुं वानरान् दिग्भ्यो महापर्वतसन्निभान् ॥४६॥ सुग्रीवः स्वयमागत्य सर्वैर्वानरयूथपैः ॥ वधयि
ष्यति देवैषां राक्षसांश्च हनिष्यति ॥४७॥ त्वयैव सहितोद्यैव गंता वानरपुंगवः ॥ पश्यांतर्भवनं
तत्र पुत्रदारसुहृद्वृतं ॥४८॥ दृष्ट्वा सुग्रीवमभयं दत्वा नयस्व सहैव ते ॥ तारया वचनं श्रुत्वा हृष्टः क्रोधो
पलक्ष्मणः ॥४९॥

आकार्षीः अतिशयेन कृतवान् अनाश्वासं निरंतरमिस्पर्धः ॥४३॥ बहुदुःखौघात् वालितः प्राप्य मानात् ॥४४
यतः प्राप्तसौख्योतः कामासक्तोपि सेवार्थं नागत इति न अपितु आगत एव काकुः अत्र कथमागतस्तत्राह आगमिष्य

ए० अ० कि० तीति ॥४५॥ एवंचैवमुग्रमकरणात्सेवां कृतवानेवेति भावः ॥४६॥४७॥ रामभ्रात्रा त्वयैव सहितो वानरपुंगवो द्दे
२१ वगंता रामसमीपमिति शेषः ॥ अंतर्भवनस्य मध्ये ॥४८॥ ते सर्वे हैव न यस्ते नैव सहनयेत्यर्थः ताराव चनेनातिमधु
रेण ललितेन कृशक्रोधः ॥४९॥ यत्र सुग्रीवः स्थितस्तं दृंतेपुरं जगाम ॥५०॥ अप्रसर्ष अतिशयेनातिभीतवद्दुत्यपात्त

जगामांतःपुरं यत्र सुग्रीवो वानरेश्वरः ॥ रुमामालिंग्य सुग्रीवः पर्यंके पर्यवस्थितः ॥५०॥ दृष्ट्वा ल
२ ता क्ष्मणमत्यर्थं उत्पपाति भीतवत् ॥ तं दृष्ट्वा लक्ष्मणः क्रुद्धो मदविह्वलितेक्षणं ॥५१॥ सुग्रीवं प्राह दु
र्वृत्त विस्मृतोसि रघूत्तमं ॥ वाली येन हतो वीरः स बाणो घ प्रतीक्षते ॥५२॥ तमेव बालिनो मार्गं गमिष्य
सि मया हतः ॥ एवमत्यंतपरुषं वदंतं लक्ष्मणं तदा ॥५३॥ उवाच हनुमान्वीरः कथमेवं प्रभाषसे ॥
त्वत्तो धिकतरो रामे भक्तो यं वानराधिपः ॥५४॥ रामकार्यार्थमनिशं जागर्त्ति न तु विस्मृतः ॥ आ
गताः परतः पश्य वानराः कोटिशः प्रभो ॥५५॥ गमिष्यंत्यचिरेणैव सीतायाः परिमार्गणं ॥ साध
यिष्यति सुग्रीवो रामकार्यमशेषतः ॥५६॥ श्रुत्वा हनूमतो वाक्यं सौमित्रिर्लज्जितो भवत् ॥
सुग्रीवोप्यर्घ्यपाद्याद्यैर्लक्ष्मणं संप्रपूजयत् ॥५७॥ आलिंग्य प्राह रामस्य दासो हं तेन रक्षितः ॥
रामः स्वतेजसा लोकान्क्षणार्धेनैव जेष्यति ॥५८॥

॥ पर्यंकादिति शेषः ॥ मदविह्वलितेक्षणं मदविकल
नेत्रं ॥५१॥ अर्घप्रतीक्षते त्वां हंतुमिति शेषः ॥५२॥५३॥५४॥ जागर्त्ति उद्यमवान्भवति अस्मिन्नेव समये ॥ आका

रणार्थं गताः वानराः सेनां कर्षतः आगता इत्या
ह आगत इति ॥५५ परिमार्गणं कर्तुमिति शेषः ॥५६
॥५७॥५८॥

राम० २१

यत्किंचिन्मयोदितं तत्समस्वेत्यर्थः॥५०॥ प्रणयात्प्रणयकोपात्॥६०॥६१॥६२॥ इति श्रीमदध्यात्मरामायणे
उ॰ पंचमः सर्गः॥५॥ दृष्ट्वेति चैलं जीर्णवासो जिनं च॥१॥ स्मितेन चारु सुंदरं मुखांबुजं यस्य तं॥२॥३॥ अनामयमारो

साहाय्यमात्रमेवाहं वानरैः सहितः प्रभो॥ सौमित्रिरपि सुग्रीवं प्राह किंचिन्मयोदितं॥५०॥ तत्सम
स्तं महाभाग प्रणयाद्भाषितं मया॥ गच्छामोद्यैव सुग्रीव रामस्तिष्ठति कानने॥६०॥ एक एवाति दुः
खार्त्तो जानकीविरहात्प्रभुः॥ तथेति रथमारुह्य लक्ष्मणेन समन्वितः॥६१॥ वानरैः सहितो राजा
राममेवान्वपद्यत॥ भेरीमृदंगैर्बहुऋक्षवानरैः श्वेतातपत्रैर्व्यजनैश्च शोभितः॥ नीलांगदा
द्यैर्हनुमत्प्रधानैः समावृतो राघवमभ्यगाद्धरिः॥६२॥ इति श्रीमदध्या॰रामायणे उमा॰ कि॰ पं
६ श्रीमहादेव उवाच॥ चमः सर्गः॥५॥ दृष्ट्वा रामं समासीनं गुहाद्वारि शिलातले॥ चैलाजिनधरं श्यामं जटामौलिविरा
जितं॥१॥ विशालनयनं शांतं स्मितचारुमुखांबुजं॥ सीताविरहसंतप्तं पश्यंतं मृगपक्षिणः॥२॥
रथाद्दूरात्समुत्पत्य वेगात्सुग्रीवलक्ष्मणौ॥ रामस्य पादयोरग्रे पेततुर्भक्तिसंयुतौ॥३॥ रामः सुग्रीव
मालिंग्य पृष्ट्वानामयमंतिके॥ स्थापयित्वा यथान्यायं पूजयामास धर्मवित्॥४॥ ततोब्रवीद्र
घुश्रेष्ठं सुग्रीवो भक्तिनम्रधीः॥ देव पश्य समायांतीं वानराणां महाचमूं॥५॥ कुलाचलादिसंभू
ता मेरुमंदरसन्निभाः॥ नानाद्वीपसरिच्छैलवासिनः पर्वतोपमाः॥६॥

॥यं अंतिके स्वसमीपे॥४॥५॥ कु
लाचला हिमालयादयः सप्त पर्वताः॥६॥ ॥०॥ ०॥ ॥ ०॥ ०॥ ०॥ ०॥ ॥

रा० अ० कि० २२ ७ अमितबल इति छेदः ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ कोटिभल्लूकवृंदपः कोटिरिति वृंदविशेषणं ॥ १२ ॥ १५ ॥ प्रत्येकतः सार्वविभक्तिकस्त
सिः एकैक इत्यर्थः ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ कार्यगौरवं जानासि अतो यस्यां दिशि ये योग्यास्तांस्तत्र नियुंक्ष्वेत्यर्थः

असंख्याताः समायांति हरयः कामरूपिणः ॥ सर्वे देवांशसंभूताः सर्वे युद्धविशारदाः ॥ ७ ॥ अत्र केचि
द्गजबलाः केचिद्दशगजोपमाः ॥ गजायुतबलाः केचिदन्येऽमितबलाः प्रभो ॥ ८ ॥ केचिदंजनकूटाभाः
केचित्कनकसन्निभाः ॥ केचिद्रक्तांतवदना दीर्घवालास्तथापरे ॥ ९ ॥ शुद्धस्फटिकसंकाशाः केचिद्राक्ष
ससन्निभाः ॥ गर्जंतः परितो यांति वानरा युद्धकांक्षिणः ॥ १० ॥ तवाज्ञाकारिणः सर्वे फलमूलाशनाः प्र
भो ॥ ऋक्षाणामधिपो वीरो जांबवान्नाम बुद्धिमान् ॥ ११ ॥ एष मे मंत्रिणां श्रेष्ठः कोटिभल्लूकवृंदपः ॥
हनूमानेष विख्यातो महासत्वपराक्रमः ॥ १२ ॥ वायुपुत्रोऽतितेजस्वी मंत्री बुद्धिमतां वरः ॥ नलो नी
लश्च गवयो गवाक्षो गंधमादनः ॥ १३ ॥ शरभो मैंदवश्चैव गजः पनस एव च ॥ वलीमुखो दधिमुखः
सुषेणस्तार एव च ॥ १४ ॥ केसरी च महासत्वः पिता हनुमतो बली ॥ एते मे यूथपा राम प्राधान्येन
मयोदिताः ॥ १५ ॥ महात्मानो महावीर्याः शक्रतुल्यपराक्रमाः ॥ एते प्रत्येकतः कोटिकोटिवानरयूथ
पाः ॥ १६ ॥ तवाज्ञाकारिणः सर्वे सर्वे देवांशसंभवाः ॥ एष वालिसुतः श्रीमानंगदो नाम विश्रुतः ॥
॥ १७ ॥ वालितुल्यबलो वीरो राक्षसानां बलांतकः ॥ एते चान्ये च बहवस्त्वदर्थे त्यक्तजीविताः ॥ १८ ॥
योद्धारः पर्वताग्रैश्च निपुणाः शत्रुघातने ॥ आज्ञापय रघुश्रेष्ठ सर्वे तव वशवर्त्तिनः ॥ १९ ॥ राम० २२

२०।२१।२२॥ अस्य पर्यमतिशयेन महाबलान् ज्ञात्वा प्रयत्नेन तानेव प्रेषयामासेत्यन्वयः। तानेवाह युवराजमिति॥२३॥
२४॥ मच्छासनपुरःसराः मच्छासनं पुरःसरमग्रे येषां ते तादृशाः॥ अनेन मच्छासनं न विस्मर्तव्यमिति सूचितं॥२५॥ प्राणं

रामः सुग्रीवमालिंग्य हर्षपूर्णाश्रुलोचनः॥ प्राह सुग्रीव जानामि सर्वं त्वं कार्यगौरवं॥२०॥ मार्गणार्थं
हि जानक्या नियुंक्ष्व यदि रोचते॥ श्रुत्वा रामस्य वचनं सुग्रीवः प्रीतिमानसः॥२१॥ प्रेषयामास बलि
नो वानरान् वानरर्षभः॥ दिक्षु सर्वासु विविधान्वानरान् प्रेष्य सत्वरं॥२२॥ दक्षिणां दिशमत्यर्थं प्र
यत्नेन महाबलान्॥ युवराजं जांबवंतं हनूमंतं महाबलं॥२३॥ नलं सुषेणं शरभं मैंदं द्विविदं मे
वच॥ प्रेषयामास सुग्रीवो वचनं चेदमब्रवीत्॥२४॥ विचिन्वंतु प्रयत्नेन भवंतो जानकीं शुभां॥
मासाद्‌र्वाक् निवर्तध्वं मच्छासनपुरःसराः॥२५॥ सीतामदृष्ट्वा यदि वो मासादूर्ध्वं दिनं भवेत्॥ तदा प्रा
णांतिकं दंडं मत्तः प्राप्स्यथ वानरः॥२६॥ इति प्रस्थाप्य सुग्रीवो वानरान् भीमविक्रमान्॥ रामस्य पा
र्श्वे श्रीरामं नत्वा चोपविवेश सः॥२७॥ गच्छंतं मारुतिं दृष्ट्वा रामो वचनमब्रवीत्॥ अभिज्ञानार्थमे
तन्मे ह्यंगुलीयकमुत्तमं॥२८॥ मन्नामाक्षरसंयुक्तं सीतायै दीयतां रहः॥ अस्मिन्कार्ये प्रमाणं हि
त्वमेव कपिसत्तम॥ जानामि सत्वं ते सर्वं गच्छ पंथाः शुभस्तव॥२९॥

२६॥ इति केषाणीत संबंधिनं तत्संपादक नि
तियावत्। अध्यात्मादित्वाट्ठञ्॥२६॥ श्रीरामं नत्वा तत्पार्श्वे उपविवेशेत्यन्वयः॥२७॥ मे मम अंगुलीयकं गृहाणेति
शेषः हि पादपूरणे॥२८॥ ननु अंगदादीन्विहाय मह्यमेव किमर्थं दीयते तत्राह॥ अस्मिन्निति सत्वं बलं बुद्धिंच॥२९॥

रा० अ० कि
२३

परिमार्गणे तन्निमित्तमित्यर्थः ॥ ३० ॥ ३१ ॥ किलुकिलाशब्दं मुंचंतो मुष्टिभिः क्षणाज्जघ्नुः राक्षसमिति शेषः ॥ ३२ ॥ नायमिति सुकेरवध्यत्वादिति भावः ॥ ३३ ॥ शुष्ककंठोष्ठतालुकं येषां ते ॥ ३४ ॥ ततः गह्वरात् ॥ ३५ ॥ उत्साका जलविषयोत्कंठ

एवं कपीनां राज्ञा ते विसृष्टाः परिमार्गणे ॥ सीतायाश्चांगदमुखा बभ्रमुस्तत्र तत्र ह ॥ ३० ॥ भ्रमंतो विंध्यगहने ददृशुः पर्वतोपमं ॥ राक्षसं भीषणाकारं भक्षयंतं मृगान्गजान् ॥ ३१ ॥ रावणोयमिति ज्ञात्वा केचिद्वानरपुंगवाः ॥ जघ्नुः किलुकिलाशब्दं मुंचंतो मुष्टिभिः क्षणात् ॥ ३२ ॥ नायं रावण इत्युक्त्वा ययुरन्यन्महद्वनं ॥ तृषार्त्ताः सलिलं तत्र नाविंदन् हरिपुंगवाः ॥ ३३ ॥ विभ्रमंतो महारण्ये शुष्ककंठोष्ठतालुकाः ॥ ददृशुर्गह्वरं तत्र तृणगुल्मावृतं महत् ॥ ३४ ॥ आर्द्रपक्षान्क्रौंचहंसान्निःसृतान्ददृशुस्ततः ॥ अत्रास्ते सलिलं नूनं प्रविशामो महागुहां ॥ ३५ ॥ इत्युक्त्वा हनूमानग्रे प्रविवेश तमन्वयुः ॥ सर्वे परस्परं धृत्वा बाहून्बाहुभिरुत्सुकाः ॥ ३६ ॥ अंधकारे महद्दूरं गत्वापश्यन्कपीश्वराः ॥ जलाशयान्मणिनिभतोयान्कल्पद्रुमोपमान् ॥ ३७ ॥ वृक्षान्पक्वफलैर्नम्रान्मधुद्रोणसमन्वितान् ॥ गृहान्सर्वगुणोपेतान्मणिवस्त्रादिपूरितान् ॥ ३८ ॥ दिव्यभक्ष्यान्नसहितान्मानुषैः परिवर्जितान् ॥ विस्मितास्तत्र भवने दिव्ये कनकविष्टरे ॥ ३९ ॥

॥ बंतद् इत्यर्थः ॥ परस्परं बाहुभिर्बाहून्धृत्वा सर्वे हनूमंतमन्वयुः अंधकारादेवं करणं ॥ ३६ ॥ महद्दूरं बहुदूरमित्यर्थः मणिनिभजलान्मणितुल्यनिर्मलज

गद्गद्गहनां विअपर्वांदिः ॥ ३८ ॥ अमतद्य
विस्मिता तथ्या मधुर्यः ॥ ३९ ॥

एम०
२३

योगमास्थितां चित्तवृत्तिनिरोधजसिद्धिं प्राप्तां ॥५०॥ भक्तिमीतियोगिनीविषये किं किमर्थमागताः ॥५१॥ कुतः आगता इ
ति शेषः मत्स्थानं किं प्रधर्षय कि मितिवलात्प्रविष्टाः ॥५२॥४६॥ तथा दृष्ट्वा सुतरूपुतानुक्त्वा ॥४७॥४८॥४९॥५०॥ प्रददौ

प्रभया दीप्यमानं तु ददृशुः स्त्रियमेकलां ॥ ध्यायंतीं चीरवसनां योगिनीं योगमास्थितां ॥४०॥ प्रणेमुस्तां
महाभागां भक्त्या भीताश्च वानराः ॥ दृष्ट्वा तान् वानरान् देवी प्राह यूयं किमागताः ॥४१॥ कुतो वा कस्य
दूता वा मत्स्थानं किं प्रधर्षय ॥ तच्छ्रुत्वा हनूमानाह शृणु वक्ष्यामि देविते ॥४२॥ अयोध्याधिपतिः श्रीमा
न् राजा दशरथः प्रभुः ॥ तस्य पुत्रो महाभागो ज्येष्ठो राम इति श्रुतः ॥४३॥ पितुराज्ञां पुरस्कृत्य सभार्यः
सानुजो वनं ॥ गतस्तत्र हृता भार्या तस्य साध्वी दुरात्मना ॥४४॥ रावणेन ततो रामः सुग्रीवं सानुजो पयो ॥
सुग्रीवो मित्रभावेन रामस्य प्रियवल्लभां ॥४५॥ मार्गयध्वमिति प्राह ततो वयमुपागताः ॥ ततो वनं वि
चिन्वंतो जानकीं जलकांक्षिणः ॥४६॥ प्रविष्टा गह्वरं घोरं दैवादत्र समागताः ॥ त्वं वा किमर्थमत्रासि
का वा त्वं वद नः शुभे ॥४७॥ योगिनी च तथा दृष्ट्वा वानरानाह हृष्टधीः ॥ यथेष्टं फलमूलानि जग्ध्वा
पीत्वामृतं पयः ॥४८॥ आगच्छत ततो वक्ष्ये मम वृत्तांतमादितः ॥ तथेति भुक्त्वा पीत्वा च हृष्टास्ते सर्व
वानराः ॥४९॥ देव्याः समीपं गत्वा ते बद्धांजलिपुटाः स्थिताः ॥ ततः प्राह हनूमंतं योगिनी दिव्यदर्श
ना ॥५०॥ हेमा नाम पुरा दिव्यरूपिणी विश्वकर्मणः ॥ पुत्री
हेमायै इति शेषः ॥५१॥ ॥०॥०॥ ॥०॥ ०॥०॥ ॥ महेशं नृत्येन तोषयामास भामिनी ॥५१॥

दिव्यगंधर्वो दिव्याख्यो गंधर्वस्तस्य कन्या ॥५२॥ साहेमा ॥५३॥५४॥ तान्वानरान् रामं गत्वा तत्समीपं गत्वास्त्वा ऽर्घ्या
द्यमेव ॥५५॥ यातासि त्वं तुदिरूपं इतः पूर्वोक्तहेमानियोगात् अस्माद्देहाच्च ॥५६॥ वेगात् वेगादिव क्षणेनैवेत्यर्थः

तुष्टो महेशः प्रददाविदं दिव्यपुरं महत् ॥ अत्र स्थितास्मि सुदती वर्षाणामयुतायुतं ॥५२॥ तस्या अहं
सखी विष्णुतत्पर रामोक्षकांक्षिणी ॥ नाम्ना स्वयंप्रभा दिव्यगंधर्वतनया पुरा ॥५३॥ गच्छंती ब्रह्मलोकं
सा मामाहेदं तपश्चर ॥ अत्रैव निवसंती त्वं सर्वप्राणिविवर्जिते ॥५४॥ त्रेतायुगे दाशरथिर्भूत्वा नारा
यणोऽव्ययः ॥ भूभारहरणार्थाय विचरिष्यति कानने ॥५५॥ मार्गतो वानरास्तस्य भार्यामार्गयितुं (?) ते
ते गुहां ॥ पूजयित्वाथ तान्नू (?) गत्वा रामं स्तुत्वा प्रयत्नतः ॥५६॥ यातासि भवनं विष्णोर्योगिगम्यं स
नातनं ॥ इतो हं गंतुमिच्छामि रामं द्रष्टुं त्वरान्विता ॥५७॥ यूयं पिदध्व मक्षीणि गमिष्यथ बहिर्गुहां ॥
तथैव चक्रुस्ते वेगात् गताः पूर्वस्थितं वनं ॥५८॥ सापि त्यक्त्वा गुहां शीघ्रं ययौ राघवसन्निधिं ॥
तत्र रामं ससुग्रीवं लक्ष्मणं च ददर्श ह ॥५९॥ कृत्वा प्रदक्षिणं रामं प्रणम्य बहुशः सुधीः ॥ आ
ह गद्गदया वाचा रोमांचिततनूरुहा ॥६०॥ दासी तवाहं राजेंद्र दर्शनार्थमिहागता ॥ बहुवर्षस
हस्राणि तप्तं मे दुश्चरं तपः ॥६१॥

॥ पूर्वस्थितं वनं गताः ॥५७॥ रोमांचिततनूरुहा जातरोमांचिततनूरुहा ॥५९॥

६०॥ मायायाः परतः स्थितं तदनधीनं ॥६१॥

विवर्त्तोपादानतयांतर्यामितया च सर्वभूतानां बहिरंतरवस्थितमपि तैरलक्ष्य जवनिकानटानां वेषग्रहणस्यानाव
रणं परनिर्मितं नष्टाश्च तत्र प्रविष्टास्तया छन्ना भवंति तद्वद्योगमायया त्वं छन्नो गुप्तः कृतः सन् अज्ञानदृशां तै
रित्यर्थः ॥ ६२ ॥ नलक्ष्यसे रूपधृक् तत्तद्रामादिरूपधृक् शैलूषो नट इव सम्यग्दाशरथ्यादिवेषं छलात् रामाद्यनुकरणं करोति
तदा राम इत्येव गृह्यते न तु स्ववेषं दर्शितवान् रूपेण तद्वत् ॥ ६४ ॥ भागवतानां भगवन्निष्ठानां वतां एवंभूते रूपे भक्तियो

गृहायां दर्शनार्थं तेपे फलितं मे घृतत्तपः ॥ अद्य हित्वा नमस्यामि मायायाः परतः स्थितं ॥ ६२ ॥ सर्वभूतेषु
चालक्ष्यं बहिरंतरवस्थितं ॥ योगमायाजवनिकाच्छन्नो मानुषविग्रहः ॥ ६३ ॥ न लक्ष्यसे ज्ञानदृशां
शैलूष इव रूपधृक् ॥ महाभागवतानां त्वं भक्तियोगविधित्सया ॥ ६४ ॥ अवतीर्णोसि भगवन् कथं
जानामि तामसी ॥ लोके जानातु यः कश्चित्तव तत्त्वं रघूत्तम ॥ ६५ ॥ ममैतदेव रूपं ते सदा भातु हृदाल
ये ॥ राम ते पादयुगलं दर्शितं मोक्षदर्शनं ॥ ६६ ॥ अदर्शनं भवार्णानां सन्मार्गपरिदर्शनं ॥ धनपुत्र
कलत्रादिविभूतिपरिदर्शितः ॥ ६७ ॥

एवंविधित्सया भक्तिरूपो योगस्तदनिच्छया त्वमवतीर्णोसि तादृशं त्वां
स्त्रीशरीरत्वात् तामसी अहं कथं जानामि अथ योग्यस्य बोधितदुर्ज्ञानापेक्षा मे नास्तीत्याह लोके इति न वा तत्वं चिदा
नंदादिरूपं ॥ ६४ ॥ स्वापेक्ष्यमर्थमाह ॥ ममैतदिति मोक्षदर्शनं मोक्षोपायदर्शकं पादयुगलं त्वया दर्शितं अतोऽन्याकां
क्षा मे नास्तीत्यर्थः ॥ ६५ ॥ तदेव विशिनष्टि ॥ अदर्शनमिति भवार्णानां भवार्णवानामित्यर्थः वर्णलोप आर्षः सन्मार्गस्तत्व
ज्ञानोपायः धनादिगर्वगर्वितो जनः अकिंचनानां त्यक्तसर्वविषयाणां ॥ धनभूतं दरिद्रस्य धनमिवेष्टविषयं त्वां

पः संसारः स्वरूपश्चमात्तत्त्वसे ॥ ६७ ॥

अभिधातुं वा त्वालापं कर्तुं स्तोतुं वा नार्हति तथापि
स्तौमीति शेषः ॥ ६८ ॥ निवृत्तौ गुणमार्गप्रवृत्तिमार्गे

स्वात्मन्येव चिदानंदरूपे ऽभिरमते तस्मै ॥ अत एव निर्गुणाय गुणानां विषयाणामपि विवर्त्तोपादानत्वात्तदात्मने कालरू
पिणं तेन सर्वसंहर्त्तृत्वं ईशानत्वेन जगत्स्रष्टृत्वं तत्पालकत्वं च उक्तं सर्वस्रष्टृत्वादेव तस्यामध्यांतवर्जितत्वं मध्यस्या
द्यंतसापेक्षत्वात्तस्याप्यभावः ॥६८॥ समं चरंतं अंतर्यामितया सर्वैः न विडंबनं मनुष्यव्यवहारानुकरणरूपं अनु
करणमेतदिति कश्चिन्नवेद ॥६९॥ समत्वादेवाह न त इत्यादि परोभिन्नः सर्वरूपत्वात्त्वेवेति भावः यद्यपि तद्द्वेष्याभ्यां

अकिंचनधनं त्वा घनाभिधातुं जनोर्हति ॥ निवृत्तगुणमार्गाय निष्किंचनधनाय ते ॥६८॥ नमः स्वात्मा
भिरमाय निर्गुणाय गुणात्मने ॥ कालरूपिणमीशानमादिमध्यांतवर्जितं ॥६९॥ समं चरंतं सर्वत्र म
न्ये त्वां पुरुषं परं ॥ देवत्ते चेष्टितं कश्चिन्न वेद न विडंबनं ॥७०॥ न तेऽस्ति कश्चिद्दयितो द्वेष्यो वा पर एव च ॥
त्वन्मायापिहितात्मानस्त्वां पश्यंति तथाविधं ॥७१॥ अजस्याकर्त्तुरीशस्य देवतिर्यङ्नरादिषु ॥ जन्मक
र्मादिकं यद्यत्तदत्यंतविडंबनं ॥७२॥ त्वामाहुरक्षरं जातं कथाश्रवणसिद्धये ॥ केचित्कोसलराजस्य
तपसः फलसिद्धये ॥७३॥

॥ परउदासीनः तथाविधं शत्रुमित्रोदासीनवत्तं यथा रावणः शत्रुर्विभीषणो मित्रं अ
न्ये उदासीना इति ॥७०॥ अजस्य सर्वकारणत्वात्स्वकारहीनस्य अकर्त्तुः कार्तृत्वादिधर्महीनस्य अपरिणामित्वा
दिति भावः ईशस्य संनिधानमात्रेण सर्वनियंतुः तिर्यङ्नरादिषु तिर्यंचो मत्स्यादयः तेषु च यज्जन्मकर्मादि त
दत्यंतविडंबनं अनुकरणं तत्तज्ज्ञातेरिति शेषः न तु वास्तवमिति भावः ॥७१॥ तत्र प्रकृतावतारप्रयोजनमाह

स्वदृशा रथ स्व ॥७२॥ अबुद्धानामाक्षिप्तेन र
सेवैश जातं दृश न्धुषः ॥७३॥

आद्यप्रयोजनस्यैव मुख्यत्वं प्रतिपादयितुं तच्छ्रवणादिजां सिद्धिमाह पश्य एवं तीत्यादिना ॥ ७४ ॥ पश्यंतीति ते तव पादा
ब्जं पश्यंती त्यन्वयः ॥ त्वत्पादाब्ज दर्शनमेव तच्छ्रवणजामुख्या सिद्धिरित्यर्थः त्वत्पादाब्ज शब्देन मुख्यं चिदानंदात्म
कं तत्त्वरूपमेव विवक्षित मित्याह त्वामायेति त्वन्मायागुणैः सत्वरजस्तमोभिर्बद्धो यो ऽहंमः अहंकारविशिष्टा
स्तेभ्यो व्यतिरिक्तं तद्दोषास्पृष्टं गुणनामा अयं प्रवर्तकं यद्रूपं तद्दर्शनमेव तत्त्वजन्मा सिद्धिरित्यर्थः ॥ ७५ ॥ अवि

कोसल्या याभ्यार्थ्यमानं जातमाहुः परे जनाः ॥ दुष्टराक्षसभूभारहरणायार्थितो विभुः ॥ ७४ ॥ ब्रह्मणा
नररूपेण जातोयमिति केचन ॥ शृण्वंति गायंति च ये कथास्ते रघुनंदन ॥ ७५ ॥ पश्यंति तव पादाब्जं
भवार्णव सुतारणं ॥ त्वन्मायागुणबद्धाहं व्यतिरिक्तं गुणाश्रयं ॥ ७६ ॥ कथं त्वां देव जानीयां स्तोतुं वा
विषयं विभुं ॥ नमस्यामि रघुश्रेष्ठं बाणासनशरान्वितं ॥ ७७ ॥ लक्ष्मणेन सह भ्रात्रा सुग्रीवादिभि
रन्वितं ॥ एवं स्तुतो रघुश्रेष्ठः प्रसन्नः प्रणतार्तिहृत् ॥ ७८ ॥ उवाच योगिनीं भक्तां किंते मनसि कां
क्षितं ॥ सा प्राह एघवं भक्त्या भक्तिं ते भक्तवत्सल ॥ ७९ ॥ यत्र कुत्रापि जातायां निश्चलां देहि मे प्रभो ॥
त्वद्भक्तेषु सदा संगो भूयान्मे प्राकृतेषु न ॥ ८० ॥

॥ विषयं वाङ्मनोऽविषयं त्वां स्तोतुं वा कथं तानीयां प्रवृत्ता
भवेयं तद्ज्ञानं तु दुर्लभमेव स्तोतुमपि न सामर्थ्यमिति भावः एवं च स्तुतेरशक्यत्वात् केवलं प्रणाममेव करोमीत्याह
नमस्यामीति ॥ ७६ ॥ प्रसन्नः सन्प्रणतानाम घस्य पापस्य हर्त्ता ॥ ७७ ॥ निश्चलां भक्तिं देहीत्यन्वयः ॥ ७८ ॥ प्राकृतेषु
त्वद्भक्तिहीनेषु संसारासक्तेष्विति यावत् ॥ ७९ ॥ मे मानसं बहिः प्रमाणग्रणविशिष्टं रूपं स्मरतु पीतवासः संभान

अ० रा० टी० ॥ ५० ॥

३ तत्रैव मां स्मरंती सुसहेदं भूतपंचकं ॥

रा० अ० कि० ॥ २ ॥ बदरीवनं वदरिकाश्रमं ॥ इदं भूतपंचात्मकमिमं देहमित्यर्थः ॥ ॥ २ ॥ परमात्मानं मां प्रपद्यसे वर्त्तमानसामीप्ये
२६ लट् ॥ अनेन स्वसायुज्यरूपा मुक्तिस्तपःपूर्वकं तत्र देहत्यागेन दर्शिता तरुषंडं तरुसमूहं ॥ ३ ॥ इति श्री अध्यात्म
रामायणे किष्किंधाकांडे षष्ठः सर्गः ॥ ६ ॥ अथ तत्रेति विमुह्यतः सीतालाभाभावादिति शेषः सीतामार्गणेन तत्र प्रा

जिह्वा मे राम रामेति भक्त्या वदतु सर्वदा ॥ मानुसं शपामलं रूपं सीतालक्ष्मणसंयुतं ॥ १ ॥ धनुर्बाणध
रं पीतवाससं मुकुटोज्ज्वलं ॥ अंगदैर्नूपुरैर्मुक्ताहारैः कौस्तुभकुंडलैः ॥ २ ॥ भांतं स्मरतु मे राम व
रनान्यं वृणे प्रभो ॥ श्रीराम उवाच ॥ भवत्वेवं महाभागे गच्छ त्वं बदरीवनं ॥ ३ ॥ मामेव परमात्मानं अ
चिरात्प्रतिपद्यसे ॥ ४ ॥ श्रुत्वा रघूत्तमवचोऽमृतसारकल्पं गत्वा तदैव बदरीतरुखंडजुष्टं ॥ ती
र्थे तदा रघुपतिं मनसा स्मरंती त्यक्त्वा कलेवरमवाप परं पदं सा ॥ ५ ॥ इति श्रीमदध्यात्मरामाय
णे उमामहेश्वरसंवादे किष्किंधा० षष्ठः सर्गः ॥ ६ ॥ अथ तत्र समासीना वृक्षखंडेषु वानराः ॥ चिं ६ श्रीमहादेवउवा
तयंतो विमुह्यंतः सीतामार्गणकर्षिताः ॥ १ ॥ तत्रोवाचांगदः कांश्चिद्वानरान्वानरर्षभः ॥ भ्रमतां
गह्वरेऽस्माकं मासो नूनं गतोऽभवत् ॥ २ ॥ सीता नाधिगतास्माभिर्न कृतं राजशासनं ॥ यदि गच्छाम किं राम०
ष्किंधां सुग्रीवोऽस्मान्हनिष्यति ॥ ३ ॥ २६

॥ मार्गणेन कर्षिताः कृशाः ॥ १ ॥ मासो गतः सुग्रीवाज्ञप्तकालात्
अधिकः कालो गत इत्यर्थः ॥ २ ॥ राजसासनं मासांतः सीतान्वेषणरूपं ॥ ३ ॥ राम राम ॥ राम ॥ राम

मिषात् । रामकार्यकरणरूपात् ॥४॥ तदेवाह इदानीमिति ॥५॥ नन्वेवमहत्त्वं लब्धधरूपं सुग्रीवः कथं कुर्यात्तत्राह
मातृकल्पमिति ज्येष्ठभ्रातृपत्नीत्वात् तेन तस्या कार्यविचारो नेति भावः ॥ एषोक्तिर्वालिभावेन मृते भर्तरि त्रैव एकि

विशेषतः शत्रुसुतं मां मिषान्निह निष्पति ॥ म पितस्य कृतो प्रीतिरहं रामेण रक्षितः ॥४॥ इदानीं राम
कार्येण न कृतं तन्मिषं भवेत् ॥ तस्य मद्धनने नूनं सुग्रीवस्य दुरात्मनः ॥५॥ मातृकल्पं भ्रातृभार्यां पापा
त्माऽनुभवत्यसौ ॥ न गच्छेयमतः पार्श्वं तस्य वानरपुंगवाः ॥६॥ सक्ष्यामि जीवितं चात्र येन केनापि
मृत्युना ॥ इत्यश्रुनयनं केचिद्दृष्ट्वा वानरपुंगवाः ॥७॥ व्यथिताः सान्त्वनया ना युवराजमथाब्रुवन् ॥८
किमर्थं तव शोको त्र वयं ते प्राणरक्षकाः ॥ भवामो निवसामो त्र गुहायां भयवर्जिताः ॥९॥ सर्वसौभा
ग्यसहितं पुरं देवपुरोपमं ॥ शनैः परस्परं वाक्यं वदतां मारुतात्मजः ॥१०॥ श्रुत्वांगदं समालिंग्य प्रो
वाच नयकोविदः ॥ विचार्यते किमर्थं ते दुर्विचारो न युज्यते ॥११॥ राज्ञोऽत्यंत प्रियस्त्वं हि तारापुत्रोऽति
वत्सभः ॥ रामस्य लक्ष्मणस्य प्रीतिस्त्वयि नित्यं प्रवर्द्धते ॥१२॥ अतो न राघवाभ्दीतिस्तव राज्ञो विशेषतः ॥
अहं तव हिते सक्तो वत्स नान्यं विचारय ॥१३॥ गुहावासस्तु निर्भेद्य इत्युक्तैर्वानरैः स्तु यत् ॥ तदेतद्रा
मबाणानाम भेद्यं किं जगत्त्रये ॥१४॥

॥ व्यतिरिक्तस्त्रियान्योपगमस्य दूषणं ॥६॥ येन केनापि उद्बन्धनादिप्रका
रेण ॥७॥ वयं ते प्राणरक्षका भवामः ॥ तदुपायमाहुः ॥ अत्र गुहायामेव वसाम इति ॥९॥ शनैः परस्परमेवं वदतां वाक्यं श्रुत्वा इ

त्यन्वयः॥१०॥सुग्रीवतो वधादिव मितिशेषः॥अयमितरवानरोक्तो दुर्विचारो गुहावासरूपस्तत्सर्वथा न युज्यते॥११॥तत्रसु
ग्रीवतोभयंवारयति राज्ञइति तारापुत्रइत्यनेन तारायामतिप्रीतेस्त्वयि न तथा व्यवहारसंभावनापीतिभावः॥रामादपि
नभयमित्याह रामस्येति सीतालाभोपि भाव्येवेत्याह अहमिति॥अतोहेव त्सान्यं विचारं न विचारय॥१३॥वानरीमाग

येत्वां द्बौधयंस्तेते वानरा वानरर्षभ॥पुत्रदारादिकं सत्क्वा कथं स्थास्यंति ते त्वया॥१४॥अन्यद्गुह्य
तमं वक्ष्ये रहस्यं शृणुमे सुत॥रामो न मानुषो देवः साक्षान्नारायणोव्ययः॥१६॥सीताभगवती माया
जनसंमोहकारिणी॥लक्ष्मणोभुवनाधारः साक्षाच्छेषः फणीश्वरः॥१७॥ब्रह्मणा प्रार्थिताः सर्वे रक्षो
गणविनाशने॥मायामानुषभावेन जाता लोकैकरक्षकाः॥१८॥वयं च पार्षदाः सर्वे विष्णोर्वैकुंठवा
सिनः॥मनुष्यभावमापन्ने स्वेच्छया परमात्मनि॥१९॥वयं वानररूपेण जातास्तस्यैव मायया॥वयंतु
तपसा पूर्वमाराध्य जगतां पतिं॥२०॥तेनैवानुगृहीताः स्मः पार्षदत्वमुपागताः॥इदानीमपि तस्यैव
सेवां कृत्वा विमायया॥२१॥पुनर्वैकुंठमासाद्य सुखं स्थास्यामहे वयं॥इसंगदमथाश्वास्य ग
ताविंध्यं महाचलं॥२२॥विचिन्वंतोथ शनकैर्जानकीं दक्षिणांबुधेः॥तीरे महेंद्राख्यगिरेः पवि
त्रं पादमाययुः॥२३॥

॥हावासोक्तिं दूषयति॥गुहेति निर्भेद्योऽभेद्यः तदेतत् अयुक्तमितिशेषः यतो
जगत्त्रये रामबाणानामभेद्यं किं न किमपीत्यर्थः तेनात्रवासोमहेद्भामभयमिति भावः॥१४॥यदेतैर्वानरैरुक्तं व

यंते प्राणरक्षका इत्युक्तं तदपि मिथ्यैवास्माहपेक्षामिति॥१५॥१६॥१७॥रक्षोगणविनाशने तन्निमित्तं प्रार्थिताइत्यन्व
यः मायामानुषभावेनेति नतेषांवास्तवं मनुष्यत्वं किंतु मायैवेषेतिभावः॥१८॥१९॥नन्वेवं वानररूपयस्माकं किम
र्थंतत्राहतस्यैवमाययेति॥२०॥२१॥२२॥दक्षिणांबुधेस्तीरे महेंद्राख्यगिरेः पादंप्रसंतंपर्वतामायपुरित्यन्वयः॥२३

दृष्ट्वासमुद्रं दुःपारमगाधं भयवर्द्धनं॥वानराभयसंत्रस्ताः किंकुर्मइतिवादिनः॥२४॥निषेदुरुदधे
स्तीरेसर्वे चिंतासमन्विताः॥मंत्रयामासुरन्योन्यमंगदाद्यामहाबलाः॥२५॥भ्रमतामेवनोमासोगा
तोत्रैवगुहांतरे॥नदृष्टो रावणोवापिसीतावाजनकात्मजा॥२६॥सुग्रीवस्तीक्ष्णदंडोस्मान्निहंत्येववन
संशयः॥सुग्रीववधतोस्माकं श्रेयःप्रायोपवेशनं॥२७॥इतिनिश्चित्यतत्रैवदर्भानास्तीर्यसर्वतः॥उ
पाविविशुस्तेसर्वेमरणेकृतनिश्चयाः॥२८॥एतस्मिन्नंतरेतत्रमहेंद्राद्रिगुहांतरात्॥निर्गत्यप्राप्तवान्के
रागान्मृधः पर्वतसन्निभः॥२९॥दृष्ट्वाप्रायोपवेशेनस्थितान्वानरपुंगवान्॥उवाचशनकैर्गृध्रः
प्राप्तोभक्ष्योघमेबहुः॥३०॥एकैकशःक्रमात्सर्वान्भक्षयामिदिनेदिने॥श्रुत्वातद्गृध्रवचनंवा
नराभीतमानसाः॥३१॥भक्षयिष्यतिनःसर्वान्असौगृध्रोनसंशयः॥रामकार्यंचनास्माभिः कृतं किष्किं० ४९

भयवर्द्धनं दर्शनमात्रेण भयवृद्धिकरं किंकुर्मइतिवादिनः वदनशीलाः संतरुदधेस्तीरे निषेदुरप्यमंत्रयामासुरित्य
न्वयः॥२४॥२५॥गुहांतरेगुहामध्येवाशब्दाचप्यर्थौ॥२६॥सुग्रीववधतः सुग्रीवात्प्राप्स्यमानवधतः प्रायोपवेशनं तत्रासु

पापाभावेऽनाशनेनमरणसंकल्पः॥२७॥उपाविवेशु रित्यत्रगुणआर्षः॥२८॥२९॥व हु वि पु लो व हु सं रव्यश्च ३० ३१ किंचित्किं
चिदपीत्यर्थः॥हरीश्वराइत्यंगदहनूमदादीन्संबोध्येतरवानरवाक्यं॥३२॥सुग्रीवहितंजानकीसमाचारो भक्त्याराम संतो
ष रूपं आत्मनोहितं तथासुग्रीवतोष रूपं अनेनगृध्रेण हृष्यावधंनाशंप्रासाः प्रापिताः यमसादनं यमगृहं गच्छामः वर्त्त

सुग्रीवस्यापि च हितं न कृतं स्वात्मनामपि॥ दृष्यानेनवधंप्राप्ता गच्छामो यमसादनं॥३३॥अहो जटायु
र्धर्मात्मा रामस्यार्थेमृतः सुधीः॥ मोक्षं प्राप दुरावापं योगिनामप्यरिंदमः॥३४॥संपातिस्तु तदावाक्यं
श्रुत्वावानरभाषितं॥ केवायूयंममभ्रातुः कर्णपीयूषसंन्निभं॥३५॥जटायुरितिनामाघुव्याहरंतः
परस्परं॥ उच्यतांवोभयंमाभून्मत्तः प्लवगसत्तमाः॥३६॥तमुवाचांगदः श्रीमानुत्थितोगृध्रस
न्निधौ॥ रामोदाशरथिः श्रीमानू लक्ष्मणेन समन्वितः॥३७॥सीतयाभार्यया सार्धं विचचारव
नांतरे॥ तस्यसीताहृतासाध्वी रावणेन दुरात्मना॥३८॥मृगयांनिर्गते रामे लक्ष्मणेच हृता बलात्॥
रामरामेतिक्रोशंती श्रुत्वागृध्रः प्रतापवान्॥३९॥जटायुर्नाम पक्षीन्द्रो युद्धं कृत्वा सुदारुणं॥रा
वणेनहतोवीरो राघवार्थे महाबलः॥४०॥

१ मनसामीप्ये लट्॥३३॥योगिनामपि दुरावापमित्यन्वयः
३५॥ यूयंकेतदुच्यतामित्यर्थः॥३६॥३७॥३८॥लक्ष्मणेचनिर्गतइत्यनुकर्षः॥रामरामेति क्रोशंती हृते त्यन्वयः
श्रुत्वातत्क्रोशनंश्रुत्वेत्यर्थः॥३९॥४०॥

४१॥४२॥परिमार्गणेन निमित्तं विषयसप्तमीयं वानरवृंदान्वत पुत्रान् अस्मान् हनूमदाद्यपेक्ष्याव हुवचनं ॥४३॥ गह्वरं गुहा भ्र
मंतइत्यस्यिताइति शेषः ॥४४॥ गतो मास इत्यस्यैवं भ्रमता मित्यादि ॥४५॥ ४६॥ ४७॥ नयध्वं मां जलांतिकं मित्युक्त्या मृगपक्ष्या
दीनामपियथा ज्ञानं धर्माधर्माधिकारोस्तीति सूचयति ॥४८॥ तत्सलिले समुद्रजले ॥४९॥ हरीश्वरैर्नीतः स्वस्यानंभ्रा

रामेणदग्धो रामस्य सायुज्यमगमत्स्वर्णात्॥ रामः सुग्रीवमासाद्य सख्यं कृत्वाग्निसाक्षिकं ॥४१॥ सुग्रीव
चोदितो हत्वा वालिनं सुदुरासदं॥ राज्यं ददौ वानराणां सुग्रीवाय महाबलः ॥४२॥ सुग्रीवः प्रेषयामास सी
तायाः परिमार्गणे॥ अस्मान्वानरवृंदान्वै महासत्वान्महाबलः ॥४३॥ मासावधिं वर्त्तध्वं नोचेत्प्रा
णान्हराम्यहं॥ इत्याज्ञया भ्रमंतोस्मिन्वने गह्वरमध्यगाः ॥४४॥ गतो मासो न जानीमः सीतां वा रावणं
च वा॥ मर्तुं प्रायोपविष्टाःस्म तीरे लवणवारिधेः ॥४५॥ यदि जानासि हे पक्षिन् सीतां कथय नः शुभां॥
अंगदस्य वचः श्रुत्वा संपातिर्हृष्टमानसः ॥४६॥ उवाच मत्प्रियो भ्राता जटायुः प्लवगेश्वराः ॥ ब
हुवर्षसहस्रांते भ्रातृत्वार्त्ता श्रुता मया ॥४७॥ वाक्सहायं करिष्येहं भवतां प्लवगेश्वराः ॥ भ्रातुः सलि
लदानाय नयध्वं मां जलांतिकं ॥ पश्चात्सर्वं शुभं वक्ष्ये भवतां कार्यसिद्धये ॥४८॥ तथेति निन्युस्ते
तीरं समुद्रस्य विहंगमं ॥ सोपि तत्सलिले स्नात्वा भ्रातुर्दत्वा जलांजलिं ॥४९॥

॥पितृस्तर्पयिः॥५०॥ सुरक्षिताः
स्तीति शेषः ॥५१॥ समुद्रमध्ये इत्यनेन चतुर्दिक्षु समुद्रपरिखमेव तद्वीपमिति सूचितं ॥ लंकामेमया दृश्यते ॥ सीता च

रा० अ० कि० दृश्यते॥५२॥ तत्र हेतुमाह॥ गृध्रत्वादिति नात्र संशयितुं क्षमं अत्र संशयो न कार्य इत्यर्थः॥५३॥५४॥ पक्षविवर्जितइत्यने
२९ नवृद्धातिशये पि गमन शक्तिहीनत्वं सूचितं॥५५॥५६॥ इति किष्किं० सप्तमः सर्गः॥७॥ पक्षहीनत्वमस्पष्ट कृतइति वानराणां
जिज्ञासं ज्ञातत्वात उत्तरमाह संपाति रित्याह संपातिरिति पुराकृतं स्ववृत्तांतं स्वशरीर॥ आत्मा त्मीयो भयवाची स्वस्वस्वभ्रा

पुनः स्वस्थान मासाद्य स्थितो नीतो हरीश्वरैः॥ संपातिः कथयामास वानरान् परिहर्षयन्॥५०॥ लं
का नाम नगर्यास्ते त्रिकूटगिरि मूर्धनि॥ तत्राशोकवने सीता राक्षसीभिः सुरक्षिता॥५१॥ समुद्रमध्ये
सा लंका शत योजन दूरतः॥ दृश्यते मे न संदेहः सीता च परिदृश्यते॥५२॥ गृध्रत्वाद्दूरदृष्टिर्मे नात्र सं
शयितुं क्षमं॥ शतयोजन विस्तीर्णं समुद्रं यस्तु लंघयेत्॥५३॥ स एव जानकीं दृष्ट्वा पुनरायास्यति
ध्रुवं॥ अहमेव दुरात्मानं रावणं हंतु मुत्सहे॥५४॥ भ्रातृहंतारमेकाकी किंतु पक्षविवर्जितः॥ यत ध्व
मतियत्नेन लंघितुं सरितांपतिं॥ ततो हंता रघुश्रेष्ठो रावणं राक्षसाधिपं॥५५॥ उल्लंघ्य सिंधुं शत
योजनायतं लंकां प्रविश्याथ विदेहकन्यकां॥ दृष्ट्वा समाभाष्य च वारिधिं पुनस्तर्तुं समर्थः कृतमो
विचार्यतां॥५६॥ इति श्रीमदध्या० उमाम० संवादे सप्तमः सर्गः॥७॥ संपातिः कथयामास स्ववृत्तां
तं पुराकृतं॥ अहं पुराजटायुश्च भ्रातारौ रू( )यौवनौ॥१॥ ॥
॥तुश्च वृत्तांतं॥ तदेवाह॥ अहमित्यादि रूढ
यौवनौ यौवनमध्यं प्राप्तौ॥१॥ श्री राम राम राम राम राम राम राम राम राम राम राम राम राम रामराम
८श्रीमहादेव उवाच॥ अथ ते कौतुकाविष्टाः संपातिं सर्ववानराः॥ पप्रच्छुर्भगवन्ब्रूहि स्वमुदंतं समादितः॥१॥ वक्‍ ८
राम० २९

अतएव बलदर्पितौ॥२॥जटायुः प्रतापितः कनिष्ठत्वात्तन्मोहतस्तं परित्रातुं पक्षेण छाद्य स्थितोहं सूर्यरश्मिभिर्दग्ध
पक्षोत्र पतितो दूरपतनान्मूर्छितश्चासमिति ज्ञेयः॥३॥४॥दिनत्रयात्तदुत्तरं पुनः प्राणसहितो दग्धपक्षको यतो तो भ्रांत

बलेन दर्पितावावां बलजिज्ञासया खगौ॥सूर्यमंडलपर्यंतं गंतुमुत्पतितौ मुदा तु॥२॥बहुयोजन
साहस्रं गतौ तत्र प्रतापितः॥जटायुस्तं परित्रातुं पक्षेणाछाद्य मोहतः॥३॥स्थितोहं रश्मिभिर्दग्ध
पक्षो विंध्यमूर्धनि॥पतितो दूरपतनान्मूर्छितोहं कपीश्वराः॥४॥दिनत्रयात्पुनः प्राणसहितो द
ग्धपक्षकः॥देशं वा गिरिकूटं वा नजाने भ्रांतमानसः॥५॥शनैरुन्मील्य नयने दृष्ट्वा तत्राश्रमं
शुभं॥शनैः शनैराश्रमस्य समीपं गतवानहं॥६॥चंद्रमा नाम मुनिराट् दृष्ट्वा मां विस्मितो वदत॥
संपाते किमिदं तेद्य विरूपं केन वा हृतं॥७॥जानामि त्वामहं पूर्वमत्यंतं बलवानसि॥दग्धौ कि
मर्थं ते पक्षौ कथ्यतां यदि मन्यसे॥८॥ततः स्वचेष्टितं सर्वं कथयित्वातिदुःखितः॥अब्रुवं मुनि
शार्दूल रविहं दावबह्निना॥९॥कथं धारयितुं शक्तो विपक्षो जीवितं प्रभो॥इत्युक्तोथ मुनिर्वीक्ष्य मां
दयार्द्रविलोचनः॥१०॥शृणु वत्स वचो मेद्य कुरु स्त्रत्वा यथेप्सितं॥देहमूलमिदं दुःखं देहः कर्मसमु
द्भवः॥११॥
मानसो देहादीन्न जाने॥५॥६॥अद्य ते इदं रूपं किं केन वा रपूर्वदृष्टं तदुत्तमं रूपं हृतं॥७॥पूर्वं बलवानसीति वर्त्तमानसामी
प्ये लट्॥८॥दावबह्निना तत्तुल्य चिंतयेत्यर्थः॥९॥चिंतामभिनयति कथमिति॥१०॥तत्र देहस्य तन्मूलस्य च तत्व ज्ञा

नं विलोकितुं समर्थः कस्तमपाणिर्मुनो केना पृष्टं इत
मिति वाक्यमकर्णयदहं॥११॥

ननु कोसावहं पदार्थो यद्बुद्धिर्देह तत्राह अहंकार इति॥ अविद्यायाजडत्वात्तत्संभवोसावपि जड इतिभावः अविद्या
संभवत्वेपि संभवकालत्रा परिच्छेदादनादिरित्युक्तः ॥१२॥ तत्सायः पिंडो यथा वह्निस्ततः॥ एव कर्तृमशक्य तथा यम
हंकारश्चिते स्यर्थः तेन चित्तादात्म्यापन्नाहंकारेण चेतनवान्॥ चैतन्यवानिव ॥१३॥ एवमात्मश्चेतनस्य अहं कृते
र्वत्वात् तत्संबंधवत्वात् अहंदेह इतिबुद्धिः तत्कृत एषः संसारः सुखादिसाधककर्मद्वारेबोध्यं ॥१४॥ एवं निर्वि

कर्म प्रवर्त्तते देहेहंबुध्यापुरुषस्य हि॥ अहंकारस्त्वनादिः स्यादविद्यासंभवो जडः॥१२॥ चिच्छाय
यासदा युक्तस्तप्तायः पिंडवत्सदा॥ तेन देहस्य तादात्म्याद्देहश्चेतनवान्भवेत्॥१३॥ देहोहमि
ति बुद्धिः स्यादात्मनोहंकृतेर्बलात्॥ तन्मूल एव संसारः सुखदुःखादिसाधकः॥१४॥ आत्मनो
निर्विकारस्य मिथ्यातादात्म्यतः सदा॥ देहोहं कर्म कर्त्ताहमितिसंकल्प्य सर्वदा॥१५॥ जीवः करोति
कर्माणि तत्फलैर्बध्यतेवशः॥ ऊर्ध्वाधो भ्रमते नित्यं पापपुण्यात्मकः स्वयं॥१६॥ कृतं मयाधि
कं पुण्यं यज्ञदानादिनिश्चितं॥ स्वर्गं गत्वा सुखं भोक्ष्ये इति संकल्पवान्भवेत्॥१७॥

१ कारस्यापि आत्म
नोहंकारादिभिर्मिथ्यातादात्म्यादेहोहं यद्यात तो तिरिक्तोपि कर्म कर्त्ताहमितिसंकल्पपूर्वकं प्रायो देहोहमिति बुद्धि
रेव सर्वस्य चित्साम्भावप्रपवशात्तद्बुद्धिविलयोपि कर्मकर्त्तेति बुद्धिरस्येवेतिभावः॥१५॥ कर्माणि करोति अहं
करोमीति संकल्पादेवावशात्फलैः सुखादिभिर्बध्यते अनेन यो नाहं कर्त्तेति भावयति तस्य नैव बंध इति सूचि
तं तद्बंधप्रकारमाह ऊर्ध्वेति पुण्येनोर्ध्वं पापेनाधो भ्रमते इत्यर्थः॥१६॥ तदेव विवरणेति कृतमिति इति संकल्पवा
नुभवेत् स्वर्गगः सुखभोगी विविधैः॥१७॥

तथैवाध्यासतः अहं बहुपुण्यकर्त्तेत्यध्यासेन तत्र स्वर्गे अनिच्छन्नपि पततीति अवशत्युक्तस्य विकरणं ॥१८॥ ततः पा
तपूर्वकं येन प्रकारेण गर्भवासस्तदुपपादयति पतितेति इंदोर्मंडले पतित्वा ततो नीहारैस्तत्किरणद्वारा भूसंबंधैः
संबंधो भूत्वा भूमौ पतित ततो व्रीह्याद्यन्नतुशयित्वेन स्थित्वा चतुर्विधं भोज्यं भक्ष्यभोज्यलेह्यचोष्यरूपं तद्रूपेण तमन्नं भू
त्वा पुरुषैर्भुज्यते ततो भोजनानंतरं रेतो भूत्वा स्थित इति शेषः ततस्तेन पुंसा स्त्रीयोनौ ऋतुकाले सिंचितः सिक्तः

तथैवाध्यासतस्तत्र चिरं भुक्त्वा सुखं महत् ॥ क्षीणपुण्यः पतत्यर्वागनिच्छन्कर्मचोदितः ॥१८॥
पतित्वा मंडले चेंदोस्ततो नीहारसंयुतः ॥ भूमौ पतित्वा व्रीह्यादौ तत्र स्थित्वा चिरं पुनः ॥१९॥ भूत्वा चतु
र्विधं भोज्यं पुरुषैर्भुज्यते ततः ॥ रेतो भूत्वा पुनस्तेन ऋतौ स्त्रीयोनि सिंचितः ॥२०॥ योनिरक्तेन संयुक्तं
जरायुपरिवेष्टितं ॥ दिनेनैकेन कललं भूत्वा रूढत्वमाप्नुयात् ॥२१॥ तत्पुनः पंचरात्रेण बुद्बुदाकार
तामियात् ॥ सप्तरात्रेण तदपि मांसपेशित्वमाप्नुयात् ॥२२॥ पक्षमात्रेण सा पेशी रुधिरेण परिप्लुता ॥
तस्या एवांकुरोत्पत्तिः पंचविंशतिरात्रिषु ॥२३॥ ग्रीवा शिरश्च स्कंधश्च पृष्ठवंशस्तथोदरं ॥ पंचधां
गानि चैवैकं जायंते मासतः क्रमात् ॥२४॥
१ आर्षत्वात्साधुः ॥२०॥ सिक्तः सजीव एकेन दिनेन जरायुपरिवेष्टितं यो
नि रक्तेन संयुक्तं कललं कललाख्यपरिणामवद्भूत्वा रूढत्वं दार्ढ्यमाप्नुयात् जरायु गर्भवेष्टनं ॥२१॥ बुद्बुदाकारतां त
दाकारपरिणामविशेषं एवमग्रेपि ॥२२॥ रुधिरेण परिप्लुता भवतीति शेषः तस्या एव पेशीरूपपरिणामस्यैव पंचविं
शतिरात्रिषु गतास्विति शेषः समासांताभावोऽनित्यत्वात् ॥२३॥ अंकुरानेवाह ग्रीवेत्यादि पंचधांगानि पंचधांगांकुराः

मासतः मासविवेकसर्गे कर्मासत्प्रथमं गीतेस्यादिं कृ ॥२४॥

ग०अ०कि०
३१

पाणी त्वाद्यप्येवमेव ॥ २५ ॥ २६ ॥ पंचमासतः पंचमे मासि दंताद्यपि पंचमे एव मासि ॥ २७ ॥ २८ ॥ विभक्तावयवत्वं पृथक्ज्ञा
नविषयावयवत्वं एतद्दृश्यमाणं च गर्भोपनिषदि वैद्यकसंहितासु शारीरके च स्फुटं विस्तरभयात्तन्नेह लिख्य
ते ॥ २९ ॥ एवं एवं बरीसाव र्धत इत्यन्वयः चैतन्यं प्राप्नोति तदभिव्यक्तिं प्राप्नोतीत्यर्थः ॥ ३० ॥ नाभीति नाभिसूत्रं नाला
ख्यं मातृरसनाड्या संबद्धं तदीयाल्परंध्रे सा गर्भजठरं प्रासान्मातृभुक्तान्नसारतो गर्भगः पिंडो वर्धते । अल्परं

पाणिपादौ तथा पार्श्वः कटि जानु तथैव च ॥ मासद्वयात्प्रजायंते क्रमेणैव न चान्यथा ॥ २५ ॥ त्रिभि
र्मासैः प्रजायंते अंगानां संधयः क्रमात् ॥ सर्वांगुल्यः प्रजायंते क्रमान्मासचतुष्टये ॥ २६ ॥ नासा कर्णौ
च नेत्रे च जायंते पंचमासतः ॥ दंतपंक्तिर्नखा गुह्यं पंचमे जायते तथा ॥ २७ ॥ अर्वाक् षण्मासतश्छि
द्रं कर्णयोर्भवति स्फुटं ॥ पायुर्मेढ्रमुपस्थं च नाभिश्चापि भवेन्नृणां ॥ २८ ॥ सप्तमे मासि रोमाणि
शिरः केशास्तथैव च ॥ विभक्तावयवत्वं च सर्वं संपद्यतेऽष्टमे ॥ २९ ॥ जठरे वर्धते गर्भः स्त्रिया एवं
विहंगम ॥ पंचमे मासि चैतन्यं जीवः प्राप्नोति सर्वशः ॥ ३० ॥ नाभिसूत्राल्परंध्रेण मातृभुक्तान्नसार
तः ॥ वर्द्धते गर्भगः पिंडो न म्रियेत स्वकर्मतः ॥ ३१ ॥

॥ अप्राशात्माहारत्वेपि स्वकर्मतो न म्रियेत न म्रियत इत्य ग०म०
र्थः ॥ ३१ ॥ सर्वाणि जन्मानि तत्तत्तानि कर्माणि च स्मृत्वा जठराग्नलयोगादिसंतप्तः ॥ ३२ ॥ वचनमाह ॥ नानेति पु ३१
त्रादिसंबंधमनुभूतवानिति संबंधः ॥ ३३ ॥ तथाकुटंबभरणसक्तया तन्मात्रासक्त्या न तु धर्मासक्त्या या ॥

न्यायैर्धर्म्यैरधर्म्यैरुपायैर्धनं कृतं मयेति शेषः ॥ तथापि विष्णुचिंतं स्वप्नेपि नाकरवमहं कृतवानित्यर्थः ॥ ३४ ॥ तत्फलं
भूतं गर्भदुःखं भुंजे इत्यन्वयः ॥ अशाश्वते तन्नायः पतितजलबिंदुवन्नश्वरे देहे शाश्वतवस्तुनीव ममेदं स्यादिति
इच्छायुक्तः ॥ ३५ ॥ न कृतमित्यस्य मयेति शेषः ॥ अनुभूये सस्य इदानीं गर्भदुःखं भुंजे इत्यनेनान्वयः ॥ ३६ ॥ ३७ ॥ योनि

मृत्वा सर्वाणि जन्मानि पूर्वकर्माणि सर्वशः ॥ जठरानलतप्तोयमिदं वचनमब्रवीत् ॥ ३२ ॥ नाना
योनिसहस्रेषु जायमानोनुभूतवान् ॥ पुत्रदारादिसंबंधं कोटिशः पशुबांधवान् ॥ ३३ ॥ कुटुंबभर
णासक्तेर्न्यायान्यायान्यायैर्धनार्जनं ॥ कृतं नाकरवं विष्णुचिंतां स्वप्नेपि दुर्भगः ॥ ३४ ॥ इदानीं तत्फलं भुंजे
गर्भदुःखं महत्तरं ॥ अशाश्वते शाश्वतवत् देहे तृष्णासमन्वितः ॥ ३५ ॥ अकार्याण्येव कृतवान् न कृतं
हितमात्मनः ॥ इत्येवं बहुधा दुःखं अनुभूय स्वकर्मतः ॥ ३६ ॥ कदा निष्क्रमणं मे स्याद्गर्भान्निरयसन्नि
भात् ॥ इत ऊर्ध्वं नित्यमहं विष्णुमेवानुपूजयेत् ॥ ३७ ॥ इत्यादि चिंतयन् जीवो योनियंत्रप्रपीडितः ॥
जायमानोतिदुःखेन नरकात्सातकी यथा ॥ ३८ ॥ पूतिव्रणान्निपतितः कृमिरेष इवापरः ॥ ततो बाल्या
दिदुःखानि सर्व एवं विभुंजते ॥ ३९ ॥ त्वया चैवानुभूतानि सर्वत्र विदितानि च ॥ न वर्णितानि मे गृध्र
यौवनादिषु संभवतः ॥ ४० ॥ एवं देहोहमित्यस्माद्भ्यासान्निरयादिकं ॥ गर्भवासादिदुःखानि भवं
त्यभिनिवेशतः ॥ ४१ ॥

यंत्रप्रपीडितः ॥ जन्मकाले अत एवातिदुःखेन जायमानः वहिः ॥ पततीति शेषः नरकात्सातकीत्येको दृष्टांतः ॥ ३८
तथा पूतिव्रणाद्दुर्गंधव्रणान्निपतितो ॥ परः कृमिरिव एष पततीति शेषः ततो बाल्यादिदुःखानि भुनक्तिः एवं

सर्वे जंतवो विभुंजते न कश्चिदेवेत्सर्वशः ॥ ३९ ॥ यानि सर्वाणि विदितानि मया वर्णितानि तु यौवनादिषु दुःखानि सर्वतः सर्वैः
प्राप्याणि सर्वत्र सर्वेषु जंतुषु विदितानि सर्वज्ञातानि त्वया चानुभूतानि तानि ~~मया वर्णितानि तु यौवनादिषु दुःखा~~
सर्वं विदितत्वादेव मया न वर्णितानि ॥ ४० ॥ एवमिति इत्यस्मादित्याकारादभ्यासाज्ज्ञातादभिनिवेशनः। अहंकर्त्तेत्या

तस्माद्देहद्वयादन्यमात्मानं प्रकृतेः परं ॥ ज्ञात्वा देहादिममतां त्यक्त्वात्मज्ञानवान्भवेत् ॥ ४२ ॥ जाग्रदा
दिविनिर्मुक्तं सत्यज्ञानादिलक्षणं ॥ शुद्धं बुद्धं सदा शांतं आत्मानमवधारयेत् ॥ ४३ ॥ चिदात्मनि प
रिज्ञाते नष्टे मोहेऽज्ञसंभवे ॥ देहः पततु वारब्धकर्मवेगेन तिष्ठतु ॥ ४४ ॥ योगिनो न हि दुःखं वा सुखं
वाज्ञानसंभवं ॥ तस्माद्देहेन सहितो यावत्प्रारब्धसंक्षयः ॥ ४५ ॥ तावत्तिष्ठ सुखेन त्वं धृतकंचु
कसर्पवत् ॥ अन्यद्रहस्यो [illegible]ते पक्षिन् शृणु मे परमं हितं ॥ ४६ ॥ त्रेतायुगे दाशरथिर्भूत्वा नाराय
णोऽव्ययः ॥ रावणस्य वधार्थाय दंडकानागमिष्यति ॥ ४७ ॥ सीतया भार्यया सार्द्धं लक्ष्मणेन समन्वि
तः ॥ तत्राश्रमे जनकजां भ्रात्रा त्यक्तां रहिते वने ॥ ४८ ॥ रावणश्चोरवन्नीत्वा लंकायां स्थापयि
ष्यति ॥ तस्याः सुग्रीवनिर्दिष्टा वानराः परिमार्गणे ॥ ४९ ॥ आगमिष्यंति जलधेस्तीरं तत्र स
मागमः ॥ त्वया तैः कारणवशाद्भविष्यति न संशयः ॥ ५० ॥

\\ धाकारात ॥ निरयस्वर्गादिकं गर्भवासादि
दुःखानि च भवंतीत्यन्वयः ॥ ४१ ॥ देहद्वयात्स्थूलसूक्ष्मरूपात् प्रागुक्तादन्यं तर्हि प्रकृतिरेवसा नेत्याह प्रकृ
तेः परं ज्ञात्वा देहादिषु ममतां अहं ममेति बुद्धिविषयतां त्यक्त्वा ॥ आत्मज्ञानवान् ॥ आत्मैवेदं सर्वमिति ज्ञान

वान्न भवेत् ॥४२॥ ध्येयात्मस्वरूपमाह ॥ जाग्रदादीति जाग्रत्स्वप्नसुषुप्तस्याख्यावस्थात्रयरहितं शुद्धं मायादोषा
लिप्तं बुद्धं बोध्यं स्वरूपं ॥४३॥ अज्ञानविघातज्जन्ये मोहे देहादिग्रहं ॥ ममत्वेन दृष्टेनां शं प्राप्ते देहस्थितौ नाशे वाः
४४ ॥ योगिन आत्मजस्याज्ञानजे सुखदुःखे न भवतः यावत्प्रारब्धक्षयो भवति तावद्देहेन सहितः सुखं तिष्ठ
यथा कंचुकवान् सर्पो यावत्तत्त्यागकालं तावत्तेन तं रंत्यजति तद्वत् ॥४६॥४६॥४७॥४८॥ परिणाम तन्नि
मित्तं ॥४९॥ तीरमागमिष्यंति तैः सहकारणाव शात् ॥ फलमिहकारणं पक्षोत्पत्तिरूपं फलायतैः समागमोभ

तदासीतास्थितिं तेभ्यः कथयस्व यथार्थतः ॥ तद्दैवत्वपक्षोद्गावुत्पत्स्यते ते पुनर्नवौ ॥५१॥ संपा
तिरुवाच ॥ बोधयामास मां चंद्रनामा मुनिकुलेश्वरः ॥ पश्यंतु पक्षौ मे जातौ नूतनावतिकोमलौ ॥५२॥
स्वस्ति वो स्तु गमिष्यामि सीतां द्रक्ष्यथ निश्चयं ॥ यत्नं कुरुध्वं दुस्तरं च समुद्रस्य विलंघने ॥५३॥ यन्ना
मस्मृतिमात्रतोऽपरिमितं संसारवारां निधिं तीर्त्वा गच्छति दुर्जनोपि परमं विष्णोः पदं शाश्वतं ॥ त
स्यैवं स्थितिकारिणस्त्रिजगतां रामस्य भक्ताः प्रिया यूयं किं न समुद्रमात्रतरणे शक्ताः कथं
वानराः ॥५४॥

विष्यति ॥५०॥ न देवाह तदैवेति ॥५१॥ निश्चयं द्रक्ष्यथ तन्नु न्युक्तपक्ष भव निश्चयेन तद्दुक्तरावण वधोप्यवश्यं
भावी स च न सीतादर्शनं विनेति तद्रक्ष्यथ यं भविष्यतीति निश्चयः ॥५३॥ यन्नाम स्मरणमात्रात् यः कश्चिद्दु
र्जनोपि इयानिति परिच्छेद रहितं संसारसमुद्रं तीर्त्वा विष्णोः पदं गच्छति ॥ एवं दृश्यमानप्रकारेण त्रिजगतां
स्थितिकारिणः सर्वजगदुत्पत्तिस्थितिलयकर्तुः स्थितिपदेनेतरद्व्युपलक्ष्यते रामस्य भक्ताः प्रियाश्च यूयं

॥ योजनपरिच्छिन्नस्य समुद्रमात्रस्य तरणे
किं कौतुकं नेवेत्यर्थः कथं कौतुकं इति भावः
कीदृशाः ॥५४॥

इतिश्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावलीविराजमानस्यहिम्मतिवर्मणः पुत्रस्यश्रीरामवर्मणः
कृतावध्यात्मरामायणसेतौकिष्किंधाकांडेऽष्टमः सर्गः ॥८॥ गतेइतिपक्षलाभादितिभावः हर्षेणेतिमहदरिष्टं
गतमितिहर्षेणतस्यास्दर्शनप्रत्ययेनसीतादर्शनमवश्यंभावीतिहर्षेणच ॥१॥ नक्रचक्रं नक्रसमूहः तरंगादि

इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेऽष्टमः सर्गः ॥८॥ गतेविहायसा १ श्रीमहादेव
गृध्रराजेवानरपुंगवाः ॥ हर्षेणमहताविष्टाः सीतादर्शनलालसाः ॥१॥ ऊचुः समुद्रंपश्यंतोन
क्रचक्रभयंकरं ॥ तरंगादिभिसल्लदमाकाशमिवदुर्ग्रहं ॥२॥ परस्परमवोचन्वैकथमेनंतराम
हे ॥ उवाचचांगदस्तत्र शृणुध्वंवानरोत्तमाः ॥३॥ भवंतोत्यंतबलिनः शूराश्चकृतविक्रमाः ॥
कोवात्रवारिधिंतीर्त्वाराजकार्यंकरिष्यति ॥४॥ एतेषांवानराणांसप्राणदाताऽनसंशयः ॥ अ
तोत्तिष्ठतुमेशीघ्रंपुरतोयोमहाबलः ॥५॥ वानराणांतुसर्वेषांरामसुग्रीवयोरपि ॥ सएवपालको
भूयान्नात्रकार्याविचारणा ॥६॥

१॥भिः तरंगाः ॥ अल्पा आदिनामहत्योल्लहयः दुर्ग्रहं दुःस्पर्शं आकाशस्पर्श
त्वं अस्यतुयाह्यादिगुतत्वात् ॥२॥ कथमेनंतरामहइतिपरस्परमवोचन्इत्यन्वयः ॥३॥ कृतेविक्रमाः पूर्ववहुशः
कृतपराक्रमाः कोराजकार्यंकरिष्यतितद्वदंत्विति शेषः ॥४॥ यस्तद्दरिष्यति अहंकर्त्तेतिसएषांप्राणदाः अतः
योमहाबलः सशीघ्रमुत्तिष्ठतुअतोतिष्ठत्वित्यार्थः संधिः ॥५॥ भूयात्भवेदित्यर्थे आर्षं ॥६॥

७॥सर्वैर्युष्माभिर्वैर्निश्चयेन प्रत्येकं स्वबलं उच्यतां ततः कार्यसाधकं निश्चेष्यामइत्यर्थः॥८॥दशोत्तरगुणं दशासं
ख्योत्तरोगुणो यस्य तं एकोदशपरो विंशतिः॥परस्त्रिंशदित्येवं क्रमेण॥९॥जांबवास्तु नवति येजिनानीत्याहेत्यर्थः
पुरा त्रिविक्रमोदेवेऽवतीर्णे सति तद्दीयभूपरिच्छेदः लक्षणं कार्यं यस्य तादृशं भूपरिच्छेदकं पादं॥१०॥एक

इत्युक्ते युवराजेन तूष्णींवानरसैनिकाः॥आसन्नोचुः किंचिदपि परस्परविलोकिनः॥७॥अंग
द उवाच॥उच्यतां वै बलं सर्वैः प्रत्येकं कार्यसिद्धये॥केन वा साध्यते कार्यं जानीमस्तदनंतरं
॥८॥अंगदस्य वचः श्रुत्वा प्रोचुर्वीरा बलं पृथक्॥योजनानां दशारभ्य दशोत्तरगुणं जगुः॥९॥
शतादर्वाक् जांबवांस्तु प्राह मध्ये वनौकसां॥पुरा त्रिविक्रमे देवे पादं भूमानलक्षणं॥१०॥त्रिःस
प्तकृत्वोहमगां प्रदक्षिणविधानतः॥इदानीं वार्धकग्रस्तो न शक्नोमि विलंघितुं॥११॥अंगदोप्या
हमे गंतुं शक्यं पारं महोदधेः॥पुनर्लंघनसामर्थ्यं न जानाम्यस्ति वा न वा॥१२॥तमाह जांबवा
न् वीरस्त्वं राजा नो नियामकः॥न युक्तं त्वां नियोक्तुं मे त्वं समर्थोसि यद्यपि॥१३॥

॥विंशतिवारं प्रदक्षि
ण विधानेनाहमगां तत्परित इति शेषः॥११॥१२॥त्वं नो नियमकोस्माकमाज्ञाकर्त्ता राजा त्वं यद्यपि समर्थोसि
तथापि त्वां नियोक्तुं मे न युक्तं॥१३॥ राम।राम राम राम।राम राम राम राम।राम राम राम।राम राम राम।राम राम राम।राम

रा० अ० कि० कार्यं केनापि कर्त्तुं च न शक्यते राजभयाद्दतो मरणं निश्चयेन स्वस्यामद्य सर्पः ॥१४॥ कार्यसिद्धिर्भविष्यति अचि
३४ रेण च भविष्यति तं दर्शयिष्यामि ॥१५॥ कार्यगौरवे प्राप्ते गुरुतरकार्ये प्राप्ते ऽज्ञेनेव किं तूष्णीं स्थीयत इत्यन्वयः
१६ ॥ अतः सामर्थ्यं दर्शय ननु सामर्थ्याभावे किं दर्शनीयमिति चेन्नेत्याह त्वमिति ॥१७॥ जनितोसि उत्पादितो

अंगद उवाच ॥ एवं चेत्पूर्ववत्सर्वे स्वस्यामो दर्भविष्टरे ॥ केनापि न कृतं कार्यं जीवितुं च न शक्य
ते ॥१४॥ तमाह जांबवान्वीरो दर्शयिष्यामि ते सुत ॥ येनास्माकं कार्यसिद्धिर्भविष्यत्यचिरेण च ॥
१५॥ इत्युक्त्वा जांबवान्प्राह हनूमंतमवस्थितं ॥ हनूमन् किं रहस्तूष्णीं स्थीयते कार्यगौरवे ॥१६
प्राप्तेऽज्ञेनैव सामर्थ्यं दर्शयाद्य महाबल ॥ त्वं साक्षाद्वायुतनयो वायुतुल्यपराक्रमः ॥१७॥ राम
कार्यार्थमेव त्वं जनितोसि महात्मना ॥ जातमात्रेण ते पूर्वं दृष्ट्वोद्यंतं विभावसुं ॥१८॥ पक्वं फलं
जिघृक्षामीत्युत्प्लुतं बाल्यचेष्टया ॥ योजनानां पंचशतं पतितोसि ततो भुवि ॥१९॥ अतस्त्वद्ब
लमाहात्म्यं को वा प्राप्नोति वर्णितुं ॥ उत्तिष्ठ कुरु एतस्य कार्यं नः पाहि सुव्रत ॥२०॥ श्रुत्वा जां
बवतो वाक्यं हनूमानतिहर्षितः ॥ चकार नादं सिंहस्य ब्रह्मांडं स्फोटयन्निव ॥२१॥

\\सि विभावसुं राम० ३४
सूर्यं ॥१८॥ जिघृक्षामीति ग्रहीष्यामीत्यर्थे आर्षं योजनानां पंचशतमुत्प्लुतं ततो भुवि पतितः ॥१९
नोस्माकं त्राहि रक्ष ॥२०॥ सिंहस्य नादं तस्येव नादमित्यर्थः ॥२१॥ ॥ ० ॥ ॥ ० ॥ ॥ ० ॥ ॥ ॥

रा०अ०कि
३५

२२॥ अानेष्ये इति छेदः रावणं गत्वा बध्वा एकहस्ते गृहीत्वा वामपाणिना स पर्वतां लंकां धृत्वा रामाग्रे क्षिपा
मि ॥२३॥ यद्वेति सीताया आनयने रामायणाभावादिति भावः ॥२४॥ दृष्ट्वैवेति न तु तां गृहीत्वा नापि रावणादीन्
गृहीत्वेत्यर्थः ॥२५॥ भगवतात् आशिषो लोट् ॥२६॥ वायुस्त्वामनुगच्छत्विति शकुनप्रार्थनं समामंत्र्य योज

बभूव पर्वताकारस्त्रिविक्रम इवापरः ॥ त्वं घयित्वा जलनिधिं छित्वा लंकां च भस्मसात् ॥२२॥ रा
वणं सकुलं हत्वा नेष्ये जनकनंदनीं ॥ यद्वा बध्वा गले रज्ज्वा रावणं वामपाणिना ॥२३॥ लंकां स
पर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहं ॥ यद्वा दृष्ट्वैव यास्यामि जानकीं शुभलक्षणां ॥२४॥ श्रुत्वा हनू
मतो वाक्यं जांबवानिदमब्रवीत् ॥ दृष्ट्वैवागच्छ भद्रं ते जीवंतीं जानकीं शुभां ॥२५॥ पश्चाद्रामेण स
हितो दर्शयिष्यसि पौरुषं ॥ कल्याणं भवतात् भद्र गच्छ त्वं विहायसा ॥२६॥ गच्छंतं रामकार्या
र्थं वायुस्त्वामनुगच्छतु ॥ इत्याशीर्भिः समामंत्र्य विसृष्टः प्लवगाधिपैः ॥२७॥ महेंद्राद्रिशिरो गत्वा
बभूवाद्भुतदर्शनः ॥२८॥ महानगेंद्रप्रतिमो महात्मा सुवर्णवर्णोरुणचारुवक्त्रः ॥ महाफणी
द्राभसुदीर्घबाहुर्वातात्मजो दृश्यत सर्वभूतैः ॥२९॥ इति श्रीमदध्यात्मरामायणे उमामहेश्व
रसंवादे किष्किंधाकांडे नवमः सर्गः ॥९॥ पंचशतानि श्लोकाः ॥ दुरितहरणः पंचपंचाशत्तु किष्किं
॥धाकांडं समाप्तं ॥०॥

पित्वा ॥२७॥ अद्भुतदर्शनः अतिमहाप्रशरीरत्वात् ॥२८॥ तदेवाह महानगेंद्रेति ॥२९॥ इति
श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावली वि० हिम्मतिवर्म्मणः पु० श्रीरामवर्मणकृताध्या

रामायणे किष्किंधाकांडे नवमः सर्गः ९

किष्किंधाकांडसमाप्तः छ॥

[OrderDescription]
,CREATED=18.02.20 12:42
,TRANSFERRED=2020/02/18 at 12:52:08
,PAGES=71
,TYPE=STD
,NAME=S0002851
,Book Name=M-2692-ADHYATAM RAMAYAN KALIKANDHA KAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,